१८१
―――
4

"॥ अथ मम्मट प्रणीत काव्यप्रकाशः ॥"

Atha Mammata pranit Kavya Prakash.

॥ श्रीगणेशाय नमः ॥ ग्रंथारंभे विघ्नविघाताय समुचितेष्टदेवतां ग्रंथकृत्परामृशति । नियतिकृत
नियमरहितां ह्लादैकमयीमनन्यपरतंत्रां नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति १
नियतिशक्त्या नियमरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारिकार
णपरतंत्रा षड्रसा न च सा हृद्यैव तैर्ब्रह्मणो निर्मितिर्निर्माणं एतद्विलक्षणा तु कविवाङ्निर्मिति
रत एव जयति जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते इहाभिधे
यसप्रयोजनमाह काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कां
तासंमिततयोपदेशयुजे २ कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव
धनं राजादिगतोचिताचारपरिज्ञानं आदित्यादेर्मयूरादीनामिवानर्थनिवारणं ४
सकलप्रयोजनमौलिभूतं समनंतरमेव रसास्वादनसमुद्भूतं विगलितवेद्यांतरमानंदं
प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत्पुराणेतिहासादिभ्यश्च
शब्दार्थयोर्गुणभावेन रसांगभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानि
पुणकविकर्म तत्कांतेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न तु रावणादिव

का०प्र०
२

कारः रसस्यहिप्राधान्यान्नालंकारता तद्भेदान्क्रमेणाह इदमुत्तममतिशयिनिव्यंग्येवा-
च्यात् ध्वनिर्बुधैःकथितः इदमितिकाव्यंबुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजक
स्यशब्दस्यध्वनिरितिव्यवहारःकृतः ततस्तन्मतानुसारिभिरन्यैरपिन्यग्भावितवाच्यव्यंग्य
व्यंजनक्षमस्यशब्दार्थयुगलस्य यथा निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोने
त्रेदूरमनंजनेपुलकितातन्वीतवेयंतनुः मिथ्यावादिनिदूतिबांधवजनस्याज्ञातपीडाग
मे [illegible] स्नातुमितोगतासिनपुनस्तस्याधमस्यांतिके १ अत्र तदंतिकमेवरंतुंगतासीर
तिप्राधान्येनाधमपदेनव्यज्यते अतादृशिगुणीभूतव्यंग्यंव्यंग्ये स्नातुंगतासीरनेनविधि
नानस्नातुंगतासीतिनिषेधप्रतीतिः पुनरितिनिषेधेनतदंतिकंरंतुमेवगतासीतिविधिप्र
तीतिः तुमध्यमे अतादृशिवाच्यादनतिशायिनि यथा ग्रामतरुणंतरुण्याः नववंजुलमं
जरीसनाथकरं पश्यंत्याः भवतिमुहुर्नितरांमलिनामुखछाया २ अत्रवंजुललतागृहेदत्त
संकेतानागतेतिव्यंग्यंगुणीभूतं तदपेक्षयावाच्यस्यैवचमत्कारकारित्वात् शब्दचित्रंवा
च्यचित्रमव्यंग्यंत्ववरंस्मृतं चित्रमितिगुणालंकारयुक्तं अव्यंग्यमितिस्फुटप्रतीयमानर

उल्लास १

रिस्तुपदेशं यथायोग्यं कवेः सुहृदयस्य च करोतीति सर्वथा तत्र यतनीयं अस्य कारणमाह शक्ति
र्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ३ शक्तिः
कवित्वबीजरूपः संस्कारविशेषः यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात् लोकस्य
स्थावरजंगमात्मकस्य लोकवृत्तस्य वा शास्त्राणां छंदोव्याकरणाभिधानकोशकलाचतुर्व
र्गगजतुरगखड्गादिलक्षणग्रंथानां काव्यानां च महाकविसंबंधिनां आदिग्रहणादिति
हासादीनां च विमर्शनात् व्युत्पत्तिः काव्यं कर्तुं विचारयितुं ये जानंति तदुपदेशेन करणे
योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्ताः तस्य काव्यस्योद्भवे निर्माणे
समुल्लासे च हेतुर्न तु हेतवः एवमस्य कारणमुक्त्वा स्वरूपमाह तददोषौ शब्दार्थौ सगुणा
वनलंकृती पुनः क्वापि गुणदोषालंकाराः वक्ष्यंते क्वापीत्यनेनैतदाह यत्सर्वत्र सालंका
रौ क्वचित्तु स्फुटालंकारविरहेपि न काव्यत्वहानिः यथा यः कौमारहरः स एव हि वरस्ता एव चैत्र
क्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः सा चैवास्मि तथापि तत्र सुरत
व्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते अत्र स्फुटो न कश्चिदलं

सोढं ती सहि सुहं अं खलो खलेण दूमिआसि मज्झकए । सम्भावणेहकरणिज्जसरिसं दाव विरइअं तुम
ए ॥ अत्र मम प्रियं रमयंत्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं । तेन च कामुकविषयं सापराधप्रकाश
नं व्यंग्यं व्यंग्यस्य यथा उअणिच्चलणिप्फंदा भिसिणीपत्तम्मि रेहइ वलाआ णिम्मलमर
गअभाअणपरिट्ठिआ संखसुत्तिव्व ॥ अत्र निःस्पंदत्वेन विश्वस्तत्वं तेन च जनरहितत्वं अतः सं
केतस्थानमेतदिति कयापि कंचित्प्रत्युच्यते अथवा मिथ्या वदसि न त्वमत्र आगतो भूरिति व्यज्यते
वाचकादीनां क्रमेण स्वरूपमाह साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः । इहागृहीतसंकेत
स्य शब्दादर्थविशेषप्रतिपत्तेरभावात् संकेतसहाय एव अर्थविशेषं प्रतिपादयति इति यस्य य
त्राव्यवधानेन संकेतो गृहीतः स तस्य वाचकः संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा यद्यप्यर्थ
र्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्यता व्यक्तिरेव तथाप्यानंत्याद्व्यभिचाराच्च तत्र संकेतः कर्तुं न
युज्यते इति गौः शुक्लश्चलती त्यादीनां शब्दानां विषयविभागो न प्राप्नोति इति च तदुपाधा
वेव संकेतः उपाधिस्तु वस्तुधर्मो वक्तृयदृच्छया संनिवेशितश्च वस्तुधर्मोऽपि द्विविधः सि
द्धः साध्यश्च सिद्धोऽपि पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च आद्यो जाति उक्तं हि वाक्यप्रदी पे

गौः स्वरूपेण न गौर्नाप्यगौः गोत्वाभिसंबंधात्तु गौरिति । द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु
विशेष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः डित्थादिशब्दानामंत्यबुद्धिनिर्ग्राह्यं संहृतक्रमं
स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति संज्ञाय दृच्छात्मक इति गौः
शुक्लश्चलति डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः । परमाण्वादीनां
तु गुणमध्ये पाठात्पारिभाषिकं गुणत्वं गुणक्रियायदृच्छानां शब्दानां वस्तुत एकरूपाणामप्याश्र
यभेदाद्भेद इव लक्ष्यते । यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालंबनभेदात् । हिमपयःशंखा
द्याश्रयेषु परमार्थतोऽभिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्यादिरभिन्नाभिधानप
प्रत्ययोत्पत्तिः तत् शुक्लत्वादि सामान्यं गुडतंडुलपाकादिष्वेवमेव पाकादित्वं बाल वृद्ध का
शुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थादिष्वर्थेषु वा डित्थत्वादि समस्ती
ति सर्वेषां शब्दानां जातिप्रवृत्तिनिमित्तमित्यन्ये । तद्वानपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रंथ
गौरवभयात् प्रकृतानुपयोगाच्च न दर्शितः । स मुख्योऽर्थस्तत्र मुख्यो व्यापारोस्याभिधीयते र
स इति साक्षात्संकेतितः । अस्येति शब्दस्य मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् अन्योऽर्थो लक्ष्य
ते यत्सा लक्षणारोपिता क्रिया ॥ ९ ॥ कर्मणि कुशल इत्यादौ दर्भग्रहणायोगात् गंगायां घोष

काव्य०
४

षड्डादौ च गंगादीनां घोषाधिकरणत्वासंभवात् मुख्यार्थस्यार्थविवेचकत्वादौ सामीप्ये च संब
धे रूढितः प्रसिद्धेः तथा गंगातटे घोष इत्यादेः प्रयोगाद्येषां तथा न प्रतिपत्तिः तेषां पावनत्वादी
नां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्चान्योर्थो मुख्येनामुख्यो लक्ष्यते यत् स आरोपितः श उ. २
ब्दव्यापारः सांतरार्थनिष्ठो लक्षणा । स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं उपादानं लक्षणं चेत्यु स्त
द्धैव सा द्विधा कुंताः प्रविशंति यष्टयः प्रविशंतीत्यादौ कुंतादिभिरात्मप्रवेशसिद्ध्यर्थं स्वसं
योगिनः पुरुषाः आक्षिप्यंते तत उपादानेनैषा लक्षणा गौरनुबंध्य इत्यादौ श्रुतिचोदितमनुबंध
नं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते विशेष्यं नाभिधा गच्छेत् क्षीणश
क्तिर्विशेषणे इति न्यायादित्युपादानलक्षणा सा न तु नोदाहर्तव्या न ह्यत्र प्रयोजनमस्ति न
वा रूढिरियं व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते यथा क्रियतामित्यत्र कर्ता कुर्वित्य
त्र कर्म प्रविश पिंडीमित्यादौ गृहं भक्षयेत्यादि च पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र न रात्रिभोजनं
लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् गंगायां घोष इत्यत्र तटस्य घोषाधिकरणता धि
सिद्धये गंगाशब्दः स्वार्थमर्पयतीत्येवमादौ लक्षणेनैषा लक्षणा उभयरूपा चेयं शुद्धा उपचा
रेणामिश्रितत्वात् अनयोर्भेदयो लक्ष्यस्य लक्षकेन न भेदरूपं ताटस्थ्यं तटादीनां गंगादिशब्दै

४

वाच्यचित्रं यथा ३

व्यंग्यार्थरहितं त्ववरं त्वधमं यथा स्वच्छंदोच्छलदच्छकच्छकुहरच्छातेतरांबुच्छटामूर्छन्
मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रो
होद्रेकमहोर्मिमेदुरमदा मंदाकिनी मंदतां ७ मित्राणां मानं ददाति परेषां मानं द्यति नाश
यतीति मानदः हयग्रीवासुरस्तं विनिर्गतं मानदमात्ममंदिराद्भवत्युपश्रुत्य यदृच्छयापि यं
ससंभ्रमेंद्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती ८ ॥ ॥ इति काव्यप्रकाशे का
व्यस्य प्रयोजनकारणस्वरूपविशेषनिर्णयो नाम प्रथमोल्लासः ॥१॥ क्रमेण शब्दार्थयोः द्वि. उल्लास
स्वरूपमाह ॥ स्याद्वाचको लाक्षणिकः शब्दोत्र व्यंजकस्त्रिधा अत्रेति काव्ये एषां स्वरूपं व प्रा. ३
क्ष्यते वाच्यादयस्तदर्थाः स्युः वाच्यलक्ष्यव्यंग्याः तात्पर्यार्थोपि केषुचित् ॥ आकांक्षासंनिधियोग्य
तावशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां परस्परसमन्वये तात्पर्यार्थो विशेषवपुरपदार्थोपि वाक्यार्थः २
समुल्लसतीत्यभिहितान्वयवादिनां मतं वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः सर्वेषां प्रा
यशोर्थानां व्यंजकत्वमपीष्यते तत्र वाच्यस्य यथा माए घरोवअरणं अज्ज हु णत्थित्ति साहिअं तुम
ए ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ९ अत्र स्वैरविहारार्थिनीति व्यज्यते लक्ष्यस्य यथा २

त्संबंधमात्रेण न तु नांतरीयकत्वेन तेन हि मंचाः क्रोशंतीत्यादौ लक्षणा न स्यात् अविनाभावे चा
क्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तं आयुर्घृतं आयुरेवेदमित्यादौ सादृश्यादन्य
त्कार्यकारणभावादिसंबंधांतरे एवमादौ तु कार्यकारणभावादिलक्षणपूर्वके सारोपाध्यव
साने अत्र गौणभेदयोर्भेदेपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनं शुद्धभे
दयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण चार्थकार्यकारित्वादि क्वचित्तादर्थ्यादुपचारः य
थेंद्रार्था स्थूणा इंद्रः क्वचित्तु स्वस्वामिभावात् यथा राजकीयः पुरुषो राजा क्वचिदव
यवावयविभावात् अग्रहस्त इत्यत्राग्रमात्रेवयवे हस्तः क्वचित्तात्कर्म्यात् यथा
अतक्षा तक्षा लक्षणा तेन षड्विधा आद्यभेदाभ्यां सह सा च व्यंग्येन रहिता सहिता तु प्र
योजने प्रयोजनेन हि व्यंजनव्यापारगम्येन भाव्यं तच्च गूढमगूढं वा तत्रेति व्यंग्यं गूढं यथा
मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः उ
रो मुकुलितस्तनं जघनमंसबंधोद्धुरं बतेंदुवदनातनौ तरुणिमोद्गमो मोदते अगूढं यथा
श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञा विदग्धचरितानां उपदिशति कामिनीनां यौवनमद एव

ललितानि २ अत्रोपदिशतीति तद्देषा कथिता त्रिधा १३ अव्यंग्या गूढागूढव्यंग्या च
तद्भूर्लाक्षणिकः शब्दः इति संबध्यते तद्भूस्तदाश्रयः तत्र व्यापारो व्यंजनात्मकः कुत इत्या
ह यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते १४ फले शब्दैकगम्येऽत्र व्यंजनान्नापरा क्रिया
प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपि तु तस्मादे
व शब्दात् न चात्र व्यंजनादृतेन्यो व्यापारः तथाहि नाभिधा समयाभावात् गंगायां घोष
इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयंते न तत्र गंगादिशब्दाः संकेतिताः हेत्वभावान्न
लक्षणा १५ मुख्याभावाद्धि लक्षणा १५ मुख्यार्थबाधादित्रयं हेतुः तथा च लक्ष्यं
न मुख्यं नाप्यत्र बाधो योगः फलेन नो न प्रयोजनमेतस्मिन्न च शब्दः स्खलद्गतिः १६ यथा गंगा
शब्दः स्रोतसि सबाध इति तटं लक्षयति तद्वद्यदि तटेपि सबाधः स्यात्तत्प्रयोजनं लक्षयेत्
२ न च तटं मुख्योर्थो नाप्यत्र बाधो न च गंगाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबंधः नापि प्र
योजने लक्ष्ये किंचित्प्रयोजनं नापि गंगाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः ए
वमप्यनवस्था स्याद्या मूलक्षयकारिणी एवमपि प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनांतरे

का० प्र०
६

ण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत् ननु पावनत्वादिधर्मयुक्तमेव तटं
लक्ष्यते गंगायास्तटे घोष इत्यतोधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा
तत्किं व्यंजनेनेत्याह प्रयोजनेन सहितं लक्षणीयं न युज्यते १७ कुत इत्याह ज्ञानस्य विष
यो ह्यन्यः फलमन्यदुदाहृतं प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा वि
शिष्टे लक्षणा नैवं व्याख्यातं विशेषाः स्युस्तु लक्षिते १८ तटादौ विशेषाः पावनत्वादयः ते चा
भिधातात्पर्यलक्षणाभ्यो व्यापारांतरेण गम्याः तच्च व्यंजनध्वननादिशब्दवाच्यमव
श्यमेषितव्यं एवं लक्षणामूलं व्यंजकत्वमुक्तं अभिधामूलं त्वाह अनेकार्थस्य शब्दस्य
वाचकत्वे नियंत्रिते संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं १९ संयोगो विप्रयोगश्च सा
हचर्यं विरोधिता अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य संनिधिः सामर्थ्यमौचिती देशः का
लो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इत्युक्तदिशा सशंखचक्रो हरिरशं
खचक्रो हरिरित्युच्यते रामलक्ष्मणाविति दाशरथौ रामार्जुनगतिस्तयोरिति भार्गवका
र्तवीर्ययोः स्थाणुं भज भवच्छिदे इति हरे सर्वं जानाति इति युष्मदर्थे कुपितो मकरध्वज इति कामे

उ-२
६

द्धेः प्रतिपादनेन तत्प्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः गंगासंबंधमात्रप्रतिप
त्तौ तु गंगातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः सारोपान्या तु यत्रोक्तौ विषयि
विषयस्तथा आरोप्यमाण आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा
लक्षणा सारोपा विषय्यंतःकृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका ११ विषयिणा
आरोप्यमाणेनांतःकृते निगीर्णेऽन्यस्मिन्नारोपविषये सति सा साध्यवसाना भेदा
विमौ च सादृश्यात्संबंधांतरतस्तथा गौणौ शुद्धौ च विज्ञेयौ इमावारोपाध्यवसानरूपौ
सादृश्यहेतू भेदौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च अत्र च स्वार्थसहचारिणो गुणा जाड्य
मांद्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तमुपयांतीति केचि
त् स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यंते न तु परार्थोऽभिधीयत इ
त्यन्ये साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे उक्तं चान्यत्र अभिधेयावि
नाभूतप्रतीतिर्लक्षणोच्यते लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति अविनाभावो

का०प्र०
७

गतेः परवारणस्य दन्तावुसे कसुभगः सततं करोभूत् तद्युक्तो व्यंजकः शब्दः तद्युक्तो व्यंजनयु
क्तः यत्सोर्थान्तरयुक् तथा अर्थोपि व्यंजकस्तत्र सहकारितया मतः २० तथेति व्यंजकः ॥
इति काव्यप्रकाशे शब्दनिर्णयो नाम द्वितीय उल्लासः॥ ॥ अर्थाः प्रोक्ताः पुरा तेषां अर्थ
व्यंजकतोच्यते॥ कीदृशीत्याह॥ वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः २१ प्रस्तावदेश
कालादेर्वैशिष्ट्यात्प्रतिभाजुषां योर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा २२ बोद्धव्यः
प्रतिपाद्यः काकुर्ध्वनेर्विकारः प्रस्तावः प्रकरणम् अर्थस्य वाच्यलक्ष्यव्यंग्यात्मनः क्रमेणोदाहरण उ. ३
णानि अइपिहुलं जलकुंभं घेत्तूण समागदह्मि सहि तुरियं समसेयसलिलणीसासणीसहा
विस्समामि खणं अत्र चौर्यरतगोपनं गम्यते उन्निदं दोब्बल्लं चिंता अलसत्तणं सणीससियं महमं
दभाइणीए केरं सहि तुह वि अहह परिहवइ अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते तथाभूतां दृष्ट्वा
नृपसदसि पांचालतनयां वने व्याधैः सुचिरमुषितं वल्कलधरैः विराटस्यावासे स्थितमनुचि
तारंभनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु अत्र मयि न योग्यः खेदः कुरुषु तु योग्य
इति काकुः प्रकाश्यते न च वाच्यसिध्यंगमत्र काकुरिति गुणीभूतव्यंग्यत्वं शक्यं प्रश्नमात्रेणापि का

७

कोर्विश्रांतेः तइया मह गंडछलनिमितां दिट्ठिं न णेसि अन्नत्तो इण्हिं सच्चेअ अहं ते अ कउल्लास
दिट्ठी अत्र मत्सखीं कपोलप्रतिप्रतिबिंबितां पश्यतस्ते दृष्टिरन्यैवाभूत् चलितायां तु तस्यामन्यैव
जातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते उद्देशोयं सरसकदलिश्रेणिशोभातिशायी कुंजोत्क
र्षांकुरितरमणीविभ्रमो नर्मदायाः किं चैतस्मिन्सुरतसुहृदस्तन्वि ते वांति वाता येषामग्रे स
रति कलिताकांडकोपो मनोभूः अत्र रतार्थं प्रविशेति व्यंग्यं णोल्लेइ अणोल्लमणा अत्ता मं घरभर च
म्मि सअलम्मि खणमेत्तं जइ संझाए होइ ण व होइ वीसामो अत्र संध्या संकेतकाल इति तटस्थं
स प्रति कयाचिद्द्योत्यते सुव्वइ समागमिस्सदि तुह पिउ अज्ज पहरमेत्तेण एमेअ कित्ति चिट्ठसि ता स
हि सज्जेसु करणिज्जं अत्रोपपतिं प्रत्यभिसर्तुं प्रस्थिता न युक्तमिति निवार्यते अन्यत्र यूयं कुसुमा
वचायं कुरुध्वमत्रास्मि करोमि सख्यः नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोंजलिर्वः
अत्र विविक्तोयं देश इति प्रच्छन्नकामुकस्त्वया भिसर्यतामिति आश्वस्तां प्रति कयाचिन्निवेद्यते गुरुअ
यण परवस पिय किं भणामि तुह मंदभाइणी अहकं अज्ज पवासं वच्चसि वच्च सअं जेव सुणसि क
रणिज्जं अत्राद्य मधुसमये यदि व्रजसि तदहं तावन्न जीवामि तव तु न जानामि गतिमिति व्यज्यते

का॰प्र॰
२

आदिग्रहणाच्छेषादेः यथा कुरंगीपांगतरंगितैरस्मयितया सौंदर्यसंपत्क्रिया प्रोल्लासस्यास्य युगं परस्प
रसमायुक्तं समासादितं आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने वाच्यस्त्रातिवारितं
प्रसरणं संकोचिते ● दोर्लते अत्रेषद्यथा प्रच्छन्नकांतविषयस्याकूतविशेषो ध्वन्यते निराप
कांक्षप्रतिपत्तये प्राप्तावसरतया पुनः पुनरुपादीयते वक्त्रादीनां भिन्नसंयोगाद्धिकादिभेदेद्वव
कृतो द्धव्यैः ~~विवक्षितपत्तमसख्या यामेवयतेति~~ योगे यथा अत्ताए श्री घएणि मज्जुइए त्थं अहंदि
यस अंपुलो पसुमा पहि परत्ति अंधि । असिज्जा इमहएणमज्जिहिसि अत्र वक्तृबोद्धव्यवैशिष्ट्या
त्ममशय्यायामेव यतेति व्यंग्यं अनेन क्रमेण लक्ष्यव्यंग्ययोरपि व्यंजकत्वमुदाहार्यं २२ शब्द
प्रमाणवेद्योर्थो व्यंजनत्वमर्थांतरं यतः अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता २३ नहि
प्रमाणांतरवेद्योर्थः ॥ ॥ इति काव्यप्रकाशे ध्वनिर्णयो नाम तृतीय उल्लासः ॥ ॥ ३ ॥
यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालंकाराणां स्वरूपमभिधानीयं तथापि धर्मिणि प्रदर्शिते धर्मा
णां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ
अर्थांतरे संक्रमितमत्यंतं वा तिरस्कृतं २४ लक्षणामूलगूढव्यंग्यप्राधान्ये सत्यविवक्षितं

X उ.३स
उ.४.प्रा

२

द्रस्य त्रिपुरारातेरिति शोभो मधुनामतः कोकिल इति वसंते पातु वो दयितामुखमिति संमुखे
भाव त्रपरमेश्वर इति राजधानीरूपादृशाद्दृ जनि चित्रभानुर्विभातीति दिने रवौ वह्नौ मित्रप
भातीति सुहृदि मित्रो भातीति रवौ इंद्रस्य वज्रेणाभिचारमारब्धः तत्र इंद्रशत्रुर्वर्धस्वेति मंप
त्रः इंद्रस्य शातयिता आश्रितः तत्र इंद्रमित्रेतेन ज्ञाते इंद्रस्य शत्रुरिति तत्पुरुषसमासादेतो
दात्तेन प्रयोक्तव्ये इंद्रः शत्रुर्यस्येति बहुव्रीहिसमासाद्याद्युदात्तेन ऋत्विजा प्रयुक्ते इत्यर्थांत
राभिधानादिंद्र एव शातयिता संपन्नः मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनस्ति यथेंद्रः शत्रुः स्वरतोपराधादिंद्रशत्रुरित्यादौ वेद एव न काव्ये
तात्पर्येन स्वरो विशेषप्रतीतिकृत आदिग्रहणात एद्दहमेत्तत्थणियाएद्दहमेत्तेहिं अच्छि
वत्तेहिं एद्दहमेत्तावत्था एद्दहमेत्तेहिं दियएहिं इत्यादावभिनयादयः इत्थं संयोगादिभिरर्थ
र्थांतराभिधायकत्वे निवारिते यस्ते काव्यस्य शब्दस्य यत्किंचिदर्थांतरं तत्र नाभिधानिय
नो तस्मान्न लक्षणा मुख्यार्थबाधाद्यभावात् दयितुविशिष्टमंजने व्यंजनमेव व्यापारः यथा
भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य यस्यानुपप्लुव

त कारणान्यथकार्याणि सहकारीणि यानि च रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः २७
विभावा अनुभावास्तत् कथ्यंते व्यभिचारिणः व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः २८
उक्तं हि भरतेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति एतद्विवृण्वते विभावैर्लल
नोद्यानादिभिरालंबनोद्दीपनकारणैः स्थायी रत्यादिको भावो जनितः अनुभावैः कटाक्षभुज
क्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितः सन्मुख्य
या रसो रामादावनुकार्ये तद्रूपतानुसंधानान्नर्तकेपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृ
तयः राम एवायमयमेव राम इति नरामोयमिति उत्तरकालिके बाधे रामोयमिति रामः स्या
द्वा न वायमिति रामसदृशोयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतु
रगादिन्यायेन रामोयमिति प्रतिपत्त्या ग्राह्ये नटे सेयं ममांगेषु सुधारसच्छटा सुपूरकर्पूरशला
किका दृशोः मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता इति दैवादहमद्य
तया चपलायतनेत्रया वियुक्तश्च अविरलविलोलजलदः कालः समुपगतः इत्यादि
काव्यानुसंधानबलात् शिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः

कार्यकारणसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगात्
गम्यगमकभावरूपादनुमीयमानोपि वस्तुसौंदर्यबलाद्रसनीयत्वेनान्यानुमीयमानविल
क्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां चर्व्यमाणो रस इति
श्रीशंकुकः २ न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपि
तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण
भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानंदमयसंविद्विश्रांतिसतत्त्वेन भोगेन भुज्यत इति भट्ट
नायकः ३ लोके प्रमदादिभिः कारणादिभिः स्थाय्यनुमानेभ्यासपाटववतां काव्ये नाट्ये
च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यै
र्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति संबंधविशेष
स्वीकारपरिहारनियमानध्यवसायात्साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्म
तया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोपि साधारणोपायबलात्तत्का
लविगलितपरिमितप्रमातृतावशोन्मिषितवेद्यांतरसंपर्कशून्यापरिमितभावेन प्र

मात्रासकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोपि गोचरीकृतश्चर्व्यमाण
तैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदय
मिव प्रविशन् सर्वांगीणमिवालिंगन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मानंदास्वादमिवानुभा
वयन्नलौकिकचमत्कारकारी शृंगारादिको रसः ४ स च न कार्यो विभावादिविनाशेपि तत
संभवप्रसंगात् नापि ज्ञाप्यः सिद्धस्य तस्याभावात् अपि तु विभावादिभिर्व्यंजितश्चर्वणीय
कारकज्ञापकाभ्यामन्यत् क्वचित् दृष्टमिति चेत् न क्वचिद्दृष्टमित्यलौकिकत्वसि
द्धेर्भूषणमेतन्न दूषणं चर्वणनिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योप्युच्यतां
लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यांतरसंस्पर्शरहित
स्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोच
र इति प्रत्येतव्योप्यभिधीयतां तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शप्रधा
नत्वात् नापि सविकल्पकः चर्व्यमाणस्यालौकिकानंदमयस्य तस्य स्वसंवेदनसिद्ध
त्वात् उभयाभावरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु उ.४

१०

वाच्यं यत्र ध्वनौ स ध्वनावविवक्षितवाच्यो ध्वनिरिति शेषः अत्र वाच्यं क्वचिदनुपयुज्यमा
नत्वादर्थांतरे परिणमितं ॥ यथा ॥ त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति आत्मीयां मति
मास्थाय स्थितिमत्र विधेहि तत् अत्र वच्म्यादि उपदेशादिरूपतया परिणमति क्वचित्पुनरनु
पपद्यमानत्वादत्यंततिरस्कृतं यथा उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भ
वता परं विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतं एतदपकारिणं विप
रीतलक्षणया कश्चिद्वक्ति विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः अन्यपरं व्यंगनिष्ठं ए
ष च कोप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः २५ आलक्ष्येति न खलु विभावानुभाव
व्यभिचार एव रसः अपि तु रसस्तैरित्यस्ति क्रमः स तु न लक्ष्यते २६ तत्र रसभावतदाभा
सभावशांत्यादिरक्रमः भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः २७ आदिग्रहणाद्
भावोदयभावसंधिभावशबलत्वानि प्रधानतया यत्र स्थितो रसादिस्तत्रालंकार्यः य
थोदाहरिष्यते यत्र तु प्रधाने वाक्यार्थेंगभूतो रसादिस्तत्र गुणभूतव्यंगे रसवत्प्रेयऊर्ज
स्विसमाहितादयोलंकारास्ते च गुणीभूतव्यंग्याभिधाने उदाहरिष्यंते तत्र रसस्वरूपमा

स्मृताः॥२८॥ तत्र शृंगारस्य द्वौ भेदौ संयोगो विप्रलंभश्चेति॥ तत्राद्यः परस्परावलोकनाा
लिंगनचुंबनाद्यनंतभेदत्वात्॥ अपरिच्छेद्य एक एव गण्यते॥ यथा॥ शून्यं वासगृहं वि
लोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं॥
विस्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चि
रं चुंबिता॥ तथा॥ त्वं मुग्धाक्षि विनैव कंचुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधा
यिनि प्रियतमे तद्वीटिकासंस्पृशि॥ शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवानंदितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥ अपरस्त्वभिलाषविरहेर्ष्याप्रवासशाप
हेतुक इति पंचविधः॥ क्रमेणोदाहरणानि॥ प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्ता
स्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि यास्वंतःकरणस्य बाह्यकरणव्यापाररोधी क्ष
णादाशंसापरिकल्पितास्वपि भवत्यानंदसांद्रो लयः॥ अन्यत्र व्रजतीति का खलु कथा नाप्य
स्य तादृक्सुहृद्यो मां नेच्छति नागतश्च हहहा कोयं विधेः प्रक्रमः इत्यल्पेतरकल्पनाकवलि
तस्वांता निशांतांतरे बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि॥ ३०॥ एषा विरहोत्कंठिता

॥१२॥

उ. ४

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमांगवलनावक्रोक्तिसंसूच
नं॥ स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति गलल्लोलाल
कैरश्रुभिः॥ प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चि
त्तेन गंतुं पुरः॥ यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृ
त्सार्थैः किमुत्सृज्यते॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणप
तितं यावदिच्छामि कर्तुं अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते
संगमं नौ कृतांतः॥५॥ हास्यादीनां क्रमेणोदाहरणानि॥ आकुंच्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मंत्रांभसां प्रतिपदं पृषतैः पवित्रे॥ तारस्वरप्रहितथूत्कमदात्प्रहारं हा हा हतोहमिति रोदिति वि
ष्णुशर्मा॥१॥ हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो धिक् प्राणान्पतितोशनिर्हुत
वहस्तेंगेषु दग्धे दृशौ॥ इत्थं घर्घरमध्यरुद्धकरुणाः पौरांगनानां गिरश्चित्रस्थानपि रोद
यंति शतधा कुर्वंति भित्तीरपि॥२॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्नि

र्यादैर्भवद्भिरुदायुधैः॥ नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करो
मि दिशां बलिं॥३॥ क्षुद्राः संत्रासमेते विजहित हरयः क्षुण्णशक्रेभकुंभा युष्मद्देहेषु लज्जां दधति
परममी सायकान्निष्पतंतः॥ सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं मेघनादः॥ किंचित्संरंभली
लानियमितजलधिं राममन्वेषयामि॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने दत्तदृष्टिः प
श्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं दर्भैर्द्धावलीढैः श्रमविवृतमुखभ्रंशि
भिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥५॥ उत्कृत्योत्कृत्य कृत्तिं
प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा
आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि
क्रव्यमव्यग्रमत्ति॥६॥ चित्रं महानेष बतावतारः क्व कांतिरेषाभिनवैव भंगी॥ लोकोत्त
रं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एव सर्गः॥ एषां स्थायिभावानाह रतिर्हासश्च शोक
श्च क्रोधोत्साहौ भयं तथा जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः॥३०॥ स्पष्टं ॥१२॥

विरोधमिति॥ श्रीमदाचार्याभिनवगुप्तपादाः॥ व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौ
द्राणां॥ अश्रुपातादयोऽनुभावाः शृंगारस्येव करुणभयानकयोः॥ चिंतादयो व्यभिचारिणः
शृंगारस्येव वीरकरुणभयानकानामिति पृथगनैकांतिकत्वात्सूत्रे मिलितानि निर्दिष्टाः॥ विय
दलिमलिनांबुगर्भमेघं मधुकरकोकिलकूजितैर्दिशांश्रीः॥ धरणिरभिनवांकुरांकटं
का प्रणतिपरे दयिते प्रसीद मुग्धे इत्यादौ॥ परिमृदितमृणालीम्लानमंगं प्रवृत्तिः कथमपि
पि परिवारप्रार्थनाभिः क्रियासु॥ कलयति च हिमांशोर्निष्कलंकस्य लक्ष्मीमभिनवकरि
दंतच्छेदपांडुः कपोलः इत्यादौ॥ दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लि
ष्यत्यरुणं गृहीतवसने किंचांचितभ्रूलतं॥ मानिन्याश्चरणानतिव्यतिकरे बाष्पांबुपूर्णेक्ष
णं चक्षुर्जातमहो प्रपंचचतुरं जातागसि प्रेयसि इत्यादौ च॥ यद्यपि विभावानामनुभाव
नमौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां च व्यभिचारिणां केवलानामेवास्थितिः तथा
प्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकांतिकत्वमिति॥२८॥ तद्वि
शेषानाह॥ शृंगारहास्यकरुणरौद्रवीरभयानकाः॥ बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः

व्यभिचारिणांब्रुवे ॥ निर्वेदग्लानिसंकाख्यास्तथासूयामदश्रमाः ॥ आलस्यंचैवदैन्यंच
चिंतामोहःस्मृतिर्धृतिः ॥ व्रीडाचपलताहर्षआवेशोजडतातथा ॥ गर्वोविषादऔत्सुक्यं
निद्रापस्मारएवच ॥ स्वप्नोविबोधोमर्षश्चाप्यवहित्थमथोग्रता ॥ मतिर्व्याधिस्तथोन्मादस्त
थामरणमेवच ॥ त्रासश्चैववितर्कश्चविज्ञेयाव्यभिचारिणः ॥ त्रयस्त्रिंशदमीभावाःस
माख्यातास्तुनामतः ॥ निर्वेदस्यामंगलप्रायस्यप्रथममनुपादेयत्वेप्युपादानंव्यभिचारि
त्वेपिस्थायिताभिधानार्थं ॥ तेननिर्वेदस्थायिभावाख्यःशांतोपिनवमोरसः ॥ यथा ॥ अ
हौवाहारेवाकुसुमशयनेवादृषदिवामणौवालोष्ठेवाबलवतिरिपौवासुहृदिवा ॥ तृणेवा
स्त्रैणेवाममसमदृशोयांतुदिवसाः ॥ क्वचित्पुण्यारण्येशिवशिवशिवेतिप्रलपतः ॥ ३१।३२
।३३।३४ ॥ रतिर्देवादिविषयाव्यभिचारितथांजितः ॥ भावःप्रोक्तःआदिशब्दात्मुनिगुरुनृप
पुत्रादिविषया ॥ कांताविषयातुव्यक्ताशृंगारः ॥ उदाहरणानि ॥ कंठकोणविनिविष्टमीश
तेकालकूटमपिमेमहामृतं ॥ अप्युपात्तममृतंभवद्वपुर्भेदवृत्तियदिरोचतेनमे ॥ हरत्य

॥का॰प्रा॰॥

॥१३॥ ध्वंसप्रवृत्तिहेतुरेष्यतः शुभस्यपूर्वाचरितैः कृतंशुभैः ॥ शरीरभाजांभवदीयदर्शनंव्यनक्ति
कालत्रितयेपियोग्यतां ॥ एवमन्यदुदार्यव्यभिचारी ॥ यथा ॥ जानेकोपपराङ्मुखीप्रियत
मास्वप्नेद्यदृष्टामयामामांसंस्पृशपाणिनेतिरुदतीगंतुंप्रवृत्तान्यतः ॥ यावत्तांपरिरभ्यचा
टुकशतैराश्वासयामिप्रियेभ्रातस्तावदहंशठेनविधिनानिद्रादरिद्रीकृतः ॥ अत्रविधिंप्र
त्यसूया ॥ तदाभासाअनौचित्यप्रवर्तिताः ॥३५॥ तदाभासारसाभासाभावाभासाः ॥ तत्ररसाभा
सोयथा ॥ स्तुमःकंवामाक्षिक्षणमपिविनायंनरमसेविलेभेकःप्राणान्रणमखमुखे
पंमृगयसे ॥ सुलग्नेकोजातःशशिमुखियमालिंगतिबलात्तवश्रीःकस्यैषामदननगरि
ध्यायसितुयं ॥ अत्रानेककामुकविषयमभिलाषंतस्याःस्तुमइत्याद्यनुगतबहुव्या
पारोपादानंव्यनक्ति ॥ भावाभासोयथा ॥ राकासुधाकरमुखीतरलायताक्षीसास्मेरयौव
नतरंगितविभ्रमास्या ॥ तत्किंकरोमिविदधेकथमत्रमैत्रींतत्स्वीकृतिव्यतिकरेकइवाभ्यु
पायः ॥ अत्रचिंताअनौचित्यप्रवृत्ता ॥ एवमन्येप्युदाहार्याः ॥ भावस्यशांतिरुदयःसंधिः ॥ राम
शबलता ॥ तथाक्रमेणोदाहरणं ॥ तस्याःसांद्रविलेपनस्तनतटप्रश्लेषमुद्रांकितंकिंवक्षो ॥१३॥
श्चरणानतिव्यतिकरव्याजेनगोपाय्यते ॥ इत्युक्तेक्कतदित्युदीर्यसहसातत्संप्रमार्ष्टुंमया

साश्लिष्टारभसेनतत्सुखवसात्तस्याश्चतद्विस्मृतं ॥ अत्रकोपस्य ॥ एकस्मिन्शयनेविप
क्षरमणीनामग्रहेमुग्धयासद्यःकोपपराङ्मुखंग्लपितयाचाटूनिर्वन्नपि ॥ आवेगादव
धीरितःप्रियतमस्तूष्णींस्थितस्तत्क्षणान्माभूत्सुप्तइवेत्यमंदवलितग्रीवंपुनर्वीक्षितः ॥
अत्रौत्सुक्यस्यउदयः ॥ उत्सिक्तस्यतपःपराक्रमनिधेरभ्यागमादेकतः ॥ तत्संगप्रियताच
वीररभसोत्फालश्चमांकर्षतः ॥ वैदेहीपरिरंभएषचमुहुश्चैतन्यमामीलयन्नानंदीहरि
चंदनेंदुशिशिरःस्निग्धोरुणद्ध्यन्यतः ॥ अत्रावेगहर्षयोःसंधिः ॥ क्वाकार्यंशशलक्ष्मणः
क्वचकुलंभूयोपिदृश्येतसादोषाणांप्रशमायमेश्रुतमहोकोपेपिकांतंमुखं ॥ किंवक्ष्यंता
पकल्मषाःकृतधियःस्वप्नेपिसादुर्लभाचेतःस्वास्थ्यमुपेहिकःखलुयुवाधन्योधरंधा
स्यति ॥ अत्रवितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानांसंधिः ॥ भावस्थितिप्रो
क्ताउदाहृताच ॥ मुख्येरसेपितेंगित्वंप्राप्नुवंतिकदाचन ॥ ३६ ॥ तेभावशांत्यादयः ॥ अंगि
त्वंराजानुगतविवाहप्रवृत्तभृत्यवत् ॥ अनुस्वानाभसंलक्ष्यक्रमव्यंग्यस्थितिस्तुयः ॥ शब्दार्थोभ
यशक्त्युत्थस्त्रिधासकथितोध्वनिः ॥ ३७ ॥ शब्दशक्तिमूलानुरणनरूपव्यंग्योर्थशक्तिमूलानुरण

नरूपव्यंग्य उभयशक्तिमूलानुरणानरूपव्यंग्यश्चेति त्रिविधः ॥ १७ ॥ तत्राद्यअलंकारोथवस्त्वेव
शब्दाद्यत्रावभासते ॥ प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥ ३८ ॥ वस्त्वेवेति अनलंका
रं वस्तुमात्रं ॥ आद्यो यथा ॥ उल्लास्य कालकरवालमहांबुवाहं देवेन येन जरठोर्जितगर्जि
तेन ॥ निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥ अत्र वाक्य
स्यासंबंधार्थाभिधायकत्वमा प्रसांक्षीदित्य प्राकरणिक प्राकरणिकयोरुपमानोपमेयभा
वः कल्पनीय इत्यत्रोपमालंकारो व्यंग्यः ॥ तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुर
लीलः ॥ मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् ॥ अत्रैकैकस्य पदस्य द्विपद
त्वे विरोधाभासः ॥ अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ॥ अहितः सहितः साधुयशोभिरस
तामसि ॥ अत्रापि विरोधाभासः ॥ निरुपादानसंभारमभित्तावेव तन्वते ॥ जगच्चित्रं नमस्त
स्मै कलाश्लाघ्याय शूलिने ॥ अत्र व्यतिरेकः अलंकार्यस्यापि ब्राह्मणश्रमणन्यायेनालं ॥
कारता ॥ वस्तुमात्रं यथा ॥ पथियराइथसथरमथ्थि मणायथ्थरथ्थलेगामे ॥ उण्णपयउहरेये
स्थिउ दुराजर व ॥ ससिता वससु ॥ अत्रत्य उपभोगः क्षमोसि तदास्वेति व्यज्यते ॥ शनिरशनि

तदेकतरं रम्यं ॥ अत्र वस्तुना हारच्छेदोनंतरमन्युदेचरनमत्र्याश्यममुत्कण्ठयकीदृशीति व्यतिरेकः । अयं पदप्र
म्यः ॥ पविसंती घरवारं विवलिअवअणा पुलोइऊण पहं । खंधे घेत्तूण घडं हाहा नट्ठोत्ति रुअसि सहि किं
ति ॥ अत्र हेत्वलंकारेणासंकेतनिकेतनगच्छंतं दृष्ट्वा पातितो घटं गतं मिथ्यासि ॥ तदपरघटं गृहीत्वा गच्छेत्युच्यते वस्तु ॥ इ
ति पदद्योत्यं ॥ यथावा ॥ विहलंखलं तुमं सहि दट्ठूण कुडेण तरलतरदिट्ठी ॥ वारप्फंसमिसेणं अप्पा गरुओ
त्ति पाडिअ विभिण्णो ॥ विह्वलं त्वं सखि दृष्ट्वा घटेन तरलतरदृष्टिः ॥ द्वारस्पर्शमिषेणात्मा गुरुरिति पातितो
विभिन्नः ॥ अत्र नदीकूले लतागहने कृतसंकेतं अप्राप्तां गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीग
मनाय द्वारघातव्याजेन बुद्धिपूर्वकं व्याकुलतया वरः स्फोटित इति मिथ्याचेतितं तं नांक्षीमीति नाश्वासिषि ॥ तत्समी
हितः सिद्धये अहं तेस्वस्मि निकटे सर्वं समर्पयिष्ये इति द्वारघातव्याजेनेत्यपह्नुत्या वस्तु ॥ योऽन्हायममुं रसेराज्य
पिंजेस्म तोउराणं तुस्सु अमरगासा ॥ विट्ठाविन वोठ बपरवहू अहह हरइत्ति हाहि अअं ॥ अत्र कान्यालिंगेन रस्ते
रवधं चास्मानुकीत्वा अभिलषसीति त्वदीयमाचरितं वेकुं नशक्ष्यामीत्याक्षेपः ॥ परच्छपदप्रकाश्यः
एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः ॥ वाक्यप्रकाश्यस्तु पूर्वमुदाहृतं ॥ शब्दार्थोभयशक्त्युद्भवस्तु प
दप्रकाश्यो न भवतीति पंचत्रिंशद्भेदाः ॥ प्रबंधेप्यर्थशक्तिभूः ॥ यथा ॥ गृध्रगोमायुसंवादादौ ॥ यथा च ॥ कं कालव्य ॥ १८ ॥

कुलेघोरेसर्वप्राणिभयंकरे॥अलंस्थित्वाश्मशानेस्मिन्गृध्रगोमायुसंकुले॥प्रियोवायदिवाद्वेष्यःप्राणिनां
गतिरीदृशी॥नचेहजीवितःकश्चित्कालधर्ममुपागतइति॥दिवाप्रभवतोगृध्रस्यपुरुषविसर्जनपरमिदंवचनं
आदित्योयंस्थितोमूढाःस्नेहंकुरुतसांप्रतं॥बहुविघ्नोमुहूर्तोयंजीवेदपिकदाचन॥अमुंकनकवर्णाभंबा
लमप्राप्तयौवनं॥गृध्रवाक्यात्कथंमूढाःत्यजध्वमविशंकिताइति॥निशिविजृंभमाणस्यगोमायोर्जन
व्यावर्तनमिष्टंचेतिप्रबंधएवप्रथ्यते॥अन्येत्वेकादशभेदाःग्रंथविस्तरभयान्नोदाहृताः॥स्वयंतुलक्ष्यानु
सर्तव्याः॥अपिशब्दात्पदवाक्ययोः॥पदैकदेशरचनावर्णेष्वपिरसादयः॥तत्रप्रकृत्यायथा॥रइकेलिहिअ
णिवसणकरकिसलअरुद्धणअणजुअलस्स॥रुद्दस्सतइअणअणंपव्वइपरिचुंबिअंजअइ
अत्रजयतीतिनतुशोभतइत्यादि॥समानेपिस्थगनव्यापारेलोकोत्तरेणैवरूपेणास्यापिधानमितितदे
वोत्कर्षः॥पयथा॥प्रेयान्सायमपाकृतःसशपथंपादानतःकांतया॥द्वित्राण्येवपदानिवासभवनाद्या
वन्नयात्युन्मनाः॥तावत्प्रत्युतपाणिसंपुटगलन्नीवीनिबंधंधृतोधावित्वैवकृतप्रणामकमहोप्रेम्णो
विचित्रागतिः॥अत्रपदानीतिनतुद्वाराणीति॥तिङ्सुपोयथा॥पथिपथिशुकचंचूचारुराभांकुराणांदि
शिदिशिपवमानोवीरुधांलासकश्च॥नरिनरिकिरतिद्राक्सायकान्पुष्पधन्वापुरिपुरिचनिवृत्तामा

॥१९॥ लिनीमानचर्चा ॥ अत्रकिरतीतिकिरणस्यसाध्यमानत्वंनिवर्ततेतिनिवर्तनस्यसिद्धत्वं ॥ तिङंतसु J.8
पाचतत्रापिक्तप्रत्ययेनातीतत्वंद्योत्यते ॥ तिङ्सुपोर्द्वितीयमुदाहरणं ॥ यथा ॥ लिखन्नास्तेभूमिं
वहिर्वनतःप्राणदयितोनिराहाराःसख्यःसततरुदितोच्छूननयनाः ॥ परित्यक्तंसर्वंहसितपठितं
पंजरशुकैःतवावस्थाचेयंविसृजकठिनेमानमधुना ॥ अत्रलिखन्नितिनलिखतीति ॥ अपितुप्र
सादपर्यंतमास्तेइतितघाइतिध्वास्त ॥ नतुआसितइतिभूमिमितिनतुभूमावित्ति ॥ नहिबुद्धिपूर्वकंकिं
चिल्लिखतीति ॥ तिङ्सुपांविभक्तीनांव्यंग्यं ॥ संबंधस्ययथा ॥ गामारुहम्मिगामेवसामिणअरट्ठिइंणआ
णामि ॥ णाअरिआणंपइणोहरेमिजाहोमिसाहोमि ॥ अत्रनागरिकाणांइतिषष्ठ्याः ॥ रमणीयःक्षात्रि
यकुमारआसीदिति ॥ कालस्य ॥ एषाहिभग्नमाहेश्वरकार्मुकंदाशरथिंप्रतिकुपितस्यभार्गवस्योक्तिः
वचनस्ययथा ॥ ताणंगुणग्गहणाणंताणुक्कंठाणंतस्सपेमस्स ॥ ताणंभणिआणंसुंदरएरिसअं
जाअम्मवसाणं ॥ अत्रगुणग्रहणादीनांवहुत्वंप्रेम्णश्चैकत्वंद्योत्यते ॥ पुरुषव्यत्ययस्ययथा ॥ रेरेचंचललो
चनांचितरुचेचेतःप्रमुच्यस्थिरप्रेमाणंमहिमानमेणनयनामालोक्यकिंनृत्यसि ॥ किंमन्येविहरिष्यसेवत राम
हतांमुंचांतराशामिमामेषाकंठेतजटेकूनात्वधुशिल्पासंसारवारांनिधौ ॥ अत्रप्रहासःपूर्वनिपातस्ययथा ॥१९॥

येषां दोर्बलमेव दुर्बलतया ते संमतास्तैरपि प्रायः ॥ केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ॥ ये क्ष्माशक्रपु
नः पराक्रमनयस्वीकारकांतक्रमास्ते स्युर्नैव भवादृशस्त्रिजगति द्वित्राः पवित्राः परं ॥ अत्र पराक्रमस्य प्राधा
न्यं गम्यते ॥ विभक्तिविशेषस्य यथा ॥ प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसं ॥ दिवसेन
तु नरप भवानयुद्धविधिसिद्धसाधुवादपदं ॥ अत्र दिवसेनेत्यपवर्गतृतीया फलप्राप्तिं द्योतयति ॥ भूयोभूयः स
विधनगरीरथ्यया पर्यटंतं दृष्ट्वा दृष्ट्वा भवनवलभीतुंगवातायनस्था ॥ साक्षात्कामं नवमिव रतिर्मालती माध
वं यद्गाढोत्कंठाललितलुलितैरंगकैस्ताम्यतीति ॥ अत्रानुकंपाख्ले: करूपस्य तद्धितस्य ॥ परिच्छेदातीतः स
कलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ॥ विवेकप्रध्वंसादुपचितमहामोहगह
नो विकारः कोऽप्यंतर्जडयति च तापं च कुरुते ॥ अत्र प्रशब्दोपसर्गस्य ॥ कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं नि
हताश्च नो द्विषः ॥ तमांसि तिष्ठंति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां ॥ अत्र तुल्ययोगिताद्योतकस्य
चेतिनिपातस्य ॥ रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तं
वंदीवैष यशांसि गायति मरुद्यस्यैकबाणाहतिश्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥ अत्रास
साविति भुवनेष्विति गुणैरिति सर्वनामवचनप्रातिपदिकवचनानां ॥ नत्वदिति नमदिति अपित्वस्मदिति पसर्वा

न्नेपिणः ॥ भावपत्ति पर्यया दिति अन्यपि संपत्ति सुखे न नत्व भावमुखे नाभिधानस्य ॥ न तु रीणमनिकैलय
ति कलामतमदनधनुर्भुवो: पठत्यग्रे ॥ अधिवसति सकलललनामौलिमिमं चकितहरिणचलनयना ॥ अत्र
इमनिजव्ययीभावकर्मभूताधाराणां स्वरूपस्य ॥ ननु तत्वेऽनि धनुष: समीप इति मौलौ वसतीत्यत्र तादिभिस्तु
त्येष्वेषां या वक्रत्वे प्रसिद्धि कश्चित् स्वरूपस्य विशेषो य चमत्कारकारी स एव व्यंजकत्वं प्राप्नोति ॥ एवमन्येषा
मपि बोध्यं ॥ वर्णरचनानां व्यंजकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते ॥ अपिशब्दात् प्रबंधेषु नाटकादि
षु ॥ एवं रसादीनां पूर्वगणितभेदाभ्यां सह षड्भेदा: ॥ ५२ ॥ भेदास्तदेकपंचाशद्व्याख्याता: ॥ तेषां चान्योन्ययोज
नं ॥ संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया ॥ न केवलं शुद्धा एव एकपंचाशद्भेदा: भवंति ॥ यावत्तेषां स्वप्र
भेदैरेकपंचाशता संशयास्पदत्वेनानुग्राह्यानुग्राहकतया एकव्यंजकानुप्रवेशेन चेति त्रिविधेन संकरेण
परस्परनिरपेक्षरूपया एकप्रकारया संसृष्ट्या चेति चतुर्गुणने वेदखाब्धिवियच्चंद्रा: ॥ १०४०४ ॥ शुद्धभेदै:
सह शरेषुयुगखेंदव: ॥ १०४५५ ॥ तत्र दिङ्मात्रमुदाह्रियते ॥ खणपाहुणिआ देअर एसा जाए किंपि दे
भणिआ ॥ रुअइ पडोहरवलहीघरम्मि अणुणिज्जउ वराई ॥ अत्रानुनय: किमुपभोगलक्षणार्थांतरसं
क्रमित: ॥ किमनुरणनन्यायेनोपभोग एव व्यंग्य व्यंजक इति संदेह: ॥ स्निग्धश्यामलकांतिलिप्तवियतो वेल्लद्ब
लाका घना: वाता: शीकरिण: पयोदसुहृदामानंदकेका: कला: ॥ कामं संतु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे

वैदेहीतुकथंभविष्यतिहहाहादेविधीराभव॥अत्रलिप्तेतिपयोदसुहृदामितिचात्यंततिरस्कृतवाच्य
योःसंसृष्टिः॥ताभ्यांसहरामोस्मीत्यर्थांतरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेनरामपदलक्षणो
कव्यंजकानुप्रवेशेनचार्थांतरसंक्रमितवाच्यस्यरसध्वन्योःसंकरः॥एवमन्यदप्युदाहार्यं॥ ॥इतिका
व्यप्रकाशेध्वनिनिर्णयश्चतुर्थउल्लासः॥ ॥एवंध्वनौनिर्णीतेगुणीभूतव्यंग्यस्यप्रभेदानाह॥अगूढ
मपरस्यांगंवाच्यसिद्ध्यंगमस्फुटं संदिग्धतुल्यप्राधान्येकाक्वाक्षिप्तमसुंदरं॥४५॥व्यंग्यमेवंगुणीभूतव्यंग्यस्या
ष्टौभिदाःस्मृताः॥कामिनीकुचकलशवद्गूढंचमत्करोति॥अगूढमस्फुटतयावाच्यायमानमितिगुणीभूत
मेव॥अगूढंयथा॥यस्यासुहृत्कृततिरस्कृतिरेत्यतप्तसूचीव्यधव्यतिकरेणयुनक्तिकर्णौ॥कांचीगुणाग्र
थनभाजनमेषसोस्मिजीवन्नसंप्रतिभवामिकिमावहामि॥अत्रजीवन्नित्यर्थांतरसंक्रमितस्यवाच्यस्य
व्यंग्यं॥उन्निद्रकोकनदरेणुपिशंगितांगागायंतिमंजुमधुपागृहदीर्घिकासु॥एतच्चकास्तिचरवेर्नवबंधुजीव
पुष्पच्छदाभमुदयाचलचुंबिबिंबं॥अत्रचुंबनस्यात्यंततिरस्कृतवाच्यस्य॥अत्रासीत्फणिपाशबंधनविधिः
शक्त्याभवद्देवरेगाढंवक्षसिताडितेहनुमताद्रोणाद्रिरत्राहृतः॥दिव्यैरिंद्रजितःसलक्ष्मणशरैर्लोकांतरंप्रा
पितः॥केनाप्यत्रमृगाक्षिराक्षसपतेर्कृत्ताचकंठाटवी॥अत्रकेनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्यतस्याप्य
वेतिपुनरुक्तःपाठः॥अपरस्यरसादेर्वाच्यस्यवावाक्यार्थीभूतस्यांगंरसाद्यनुरणनरूपंवा॥अयंसरसनोत्कर्षी

॥ का० प्र० ॥

॥ २१ ॥ पीनस्तनविमर्दनः ॥ नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ अत्र शृंगारः करुणस्य ॥ केलासालयभा
ललोचनरुचा निर्वर्तितालक्तकव्यक्तिः ॥ पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायतां ॥ स्पर्द्धाबंधसमृद्धये
व सुदृढं रूढा यया नेत्रयोः कांतिः कोकनदानुकारसरसा सद्यः समुत्सार्यते ॥ अत्र भावस्य रसः ॥ अत्युच्चाः परि
तः स्फुरंति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती किमपि न क्लांतासि तुभ्यं नमः ॥ आश्चर्येण मुहुर्मुहुः स्तु
तिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥ अत्र भूविषयो रत्याख्यो भावो रा
जविषयस्यतिभावस्य ॥ वंदीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां श्लिष्यंति प्रणमंति लांति परितश्चुंबंति
ते सैनिकाः ॥ अस्माकं सुकृतैर्दृशोर्निपतितोस्यौचित्यवारांनिधे विध्वस्ता विपदोखिलास्तदिति तैः प्रत्यर्थि
भिः स्तूयसे ॥ अत्र भावस्य रसाभासभावाभासौ प्रथमद्वितीयार्द्धद्योत्यौ ॥ अविरलकरवालकंपनैर्भ्रुकुटीतर्जनग
र्जनैर्मुहुः ॥ ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥ अत्र भावस्य प्रशमः ॥ साकं कुरंगकदृशा मधु
पानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ॥ अन्याभिधायि तव नाम विभो गृहीतं केनापि तत्र विषमामकरोद
वस्थां ॥ अत्र त्रासस्योदयः ॥ असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विश्रंभेष्वथ च रसिकः शैलदुहि
तुः ॥ प्रमोदं वो दिश्यात्कपटवटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥ अत्रावेगधैर्ययोः ॥ राम ॥
संधिः ॥ पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी हस्तालंबं वितर हहहा व्युत्क्रमः क्वासि यासि ॥ इत्थं पृथ्वीपरि ॥ २१ ॥

वटभवद्धिद्विषोरण्यवर्ते:॥ कंन्याकंचित्फलकिशलयान्याददानाभिधत्ते॥ अत्रश्लेषकासूयाध्वनिस्तत्तिश्रमृदे
न्यपियेयोत्सुक्यानांशयस्ता॥ एतेचरसवदाद्यलंकाराः॥ यद्यपिभावोदयसंधिशबलत्वानिनामालंकारतयो
क्तानितथापिकश्चिद्ब्रूयादित्येवमुक्तं॥ यद्यपिसनास्तिकश्चिद्विषयोयत्रध्वनिगुणीभूतव्यंग्ययोः स्वभेदादिभिःस
हसंकरःसंसृष्टिर्वानास्तितथापिप्राधान्येनव्यपदेशाभवंतीतिक्वचित्केनचिद्व्यवहारः॥ जनस्थानेभ्रांतंकनकमृग
तृष्णांधितधियावचोवैदेहीतिप्रतिपदमुदश्रुप्रलपितं॥ कृतालंकाभर्तुर्वदनपरिपाटीषुघटनामयाप्तंरामत्वं
कुशलवसुतानत्वधिगता॥ अत्रशब्दशक्तिमूलोनुरणनरूपोरामेणसहोपमानोपमेयभावोवाच्यत्वंगतानी
तः॥ आगत्यसंप्रतिवियोगविसंस्थुलांगीमंभोजिनींक्वचिदपिनक्षपितत्रियामः॥ एतांप्रसादयतिपश्यशनैःप्र
भातेतन्वंगिपादपतनेनसहस्ररश्मिः॥ अत्रनायकवृत्तांतोर्थशक्तिमूलोवस्तुरूपोनिरपेक्षरविकमलिनीवृत्तां
ताध्यारोपेणस्थितः॥ वाच्यसिद्ध्यंगंयथा॥ भ्रमिमरतिमलसहृदयतांप्रलयंमूर्छांतमःशरीरसादं॥ मरणंचज
लदभुजगजंप्रसह्यकुरुतेविषंवियोगिनीनां॥ अत्रहालाहलंव्यंग्यंभुजगरूपस्यवाच्यस्यसिद्धिकृत्॥ यथावा
गच्छाम्यच्युतदर्शनेनभवतःकिंतृप्तिरुत्पद्यतेकिंत्वेवंविजनस्थयोर्हतजनःसंभावयत्यन्यथा॥ इत्यामंत्रणभ
भंगिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्करांचितगोपींहरिःपातुवः॥ अत्रच्युतादिपद
व्यंग्यमामंत्रणोत्पादितवाच्यस्य॥ एतद्भेदकवैकवक्तृगतत्वेनेत्यनयोर्भेदः॥ अस्फुटंयथा॥ अदृष्टेदर्शनोत्कंठा
दृष्टेविच्छेदभीरुता॥ नादृष्टेननदृष्टेनभवताल्लभ्यतेसुखं॥ अत्रादृष्टोयथा॥ नभवतिवियोगभयंयथानोस

॥ २२ ॥ व्यते तथा कुर्यामिति संदिग्धं ॥ संदिग्धप्राधान्यं यथा ॥ हरस्तु किंचित्परिवृत्तधैर्यश्चंद्रोदयारंभ इवांबुरा
शिः ॥ उमामुखे बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ अत्र परिचुंबितुमैच्छदिति किं प्रतीयमा
नं विलोचनव्यापारणं वा वाच्यं प्रधानमिति संदेहः ॥ तुल्यप्राधान्यं ॥ ब्राह्मणातिक्रमत्यागो भवता
मेव भूतये ॥ जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ॥ अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्ष
णात्क्षयं करिष्यतीति व्यंग्यस्य वाच्यस्य च समं प्राधान्यं ॥ काक्वाक्षिप्तं यथा ॥ मथ्नामि कौरवशतं समरे न को
पाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः ॥ संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणे
न ॥ अत्र मथ्नाम्येवेत्यादि व्यंग्यं वाच्यनिषेधसहभावेन स्थितं ॥ असुंदरं यथा ॥ वाणीरकुडंगुड्डीणसउणिको
लाहलं सुणंतीए घरकम्मवावडाए वहूए सीअंति अंगाइं ॥ अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्या
त्सीदंत्यंगानीति वाच्यं सचमत्कारं ॥ एषां भेदा यथायोग्यं वेदितव्याश्च पूर्ववत् ॥ अ० ॥ यथायोगमिति ॥ वाच्यं तेषु
स्तुमात्रेण यदालंकृतयस्तदा ॥ ध्रुवं ध्वन्यंगता तासां काव्यवृत्तेस्तदाश्रयात् ॥ इति ध्वनिकारोक्तदिशा वस्तुमात्रे
णायदालंकारो व्यज्यते ॥ न तत्र गुणीभूतव्यंग्यत्वं सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः ॥ सालंकारैः अलं
कायुक्तैश्चान्यैश्च ॥ तदुक्तं ध्वनिकृता सगुणीभूतव्यंग्यैः सालंकारैः सह प्रभेदैः स्वैः संकरसंसृष्टिभ्यां पुनर

पिद्योत्पतेवहुधाइति॥ अन्योन्ययोगादेवंस्याद्भेदसंख्यातिभूयसी॥४९॥ एवमनेनप्रकारेणावांतरभेदप्रभेदग
णानेप्रभूततरभेदगणानां॥ तथाहि॥ शृंगारस्यैवभेदप्रभेदगणनानामानंत्यं॥ कागणनासर्वेषां॥ संक्षेपेणसर्वेषां
पुरःनरस्यध्वनेस्त्रयोभेदाव्यंग्यस्यात्रिरूपत्वात्॥ तथाहि॥ किंचिद्वाच्यतांसहतेकिंचित्वन्यथा॥ तत्रवाच्यतासहमवि
चित्रंविचित्रंचेति॥ अविचित्रेतिमितिचवस्तुमात्रमलंकाररूपं॥ यद्यपिप्राधान्येनतदलंकार्यंतथापिब्राह्मणश्रमणन्याये
नतथोच्यते॥ रसादिलक्षणस्त्वर्थः स्वप्नेपिनवाच्यः॥ सहिरसादिशब्देनशृंगारादिशब्देनवाभिधीयतेनत्प्रयोगे
पिविभावाद्यप्रयोगेतस्याप्रतिपत्तेः तदप्रयोगेविभावादिप्रयोगेप्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यांविभावाद्यभिधा
नद्वारेणैवप्रतीयतइतिनिश्चीयते॥ तेनासौव्यंग्यएव॥ मुख्यार्थबाधाद्यभावान्नपुनर्लक्षणीयः॥ अर्थांतरसंक्रमिता
त्यंततिरस्कृतवाच्ययोर्वस्तुमात्ररूपंव्यंग्यंविनालक्षणैवनभवतीतिप्राक्प्रतिपादितं॥ शब्दशक्तिमूलेअभिधानियं
त्रणेनानभिधेयस्यार्थांतरस्यतेनसहोपमादेरलंकारस्यनिर्विवादंव्यंग्यत्वं॥ अर्थशक्तिमूलेपिविशेषेसंकेतः कर्तुंन
युज्यतइतिसामान्यरूपाणांपदार्थानांआकांक्षासंनिधियोग्यतावशात्परस्परंसंसर्गोयत्राशब्दार्थोपिविशेषरूपो
वाक्यार्थः तत्राभिहितान्वयवादेकावार्ताव्यंग्यस्याभिधेयतायां॥ येप्याहुः शब्दवृद्धाभिधेयांश्चप्रत्यक्षेणात्रपश्यति॥
श्रोतुश्चप्रतिपन्नत्वमनुमानेनचेष्टया॥ अन्यथानुपपत्त्यातुबोधेच्छक्तिंद्वयात्मिकां॥ अर्थापत्त्यैववबुध्यंतेसंबंधंत्रि
प्रमाणकमिति॥ प्रतिपादितदिशादेवदत्तगामानयेत्यादिउत्तमवृद्धवाक्यप्रयोगेदेशाद्देशांतरंसास्नादिमंतमर्थमध्यम

॥२३॥ वृद्धेन वर्तिसत्यनेनास्माद्वाक्यादेवंविधोर्थः प्रतिपन्न इति तच्चेष्टयानुमाय तयोरखंड वाक्यवाच्यार्थयो
रपि पर्यायवाच्यवाचकभावस्तदंशांशसंबंधमवधार्य बालस्तत्र व्युत्पद्यते ॥ परतश्चैवं गामानय देवदत्ताश्व
मानय देवदत्त गां नयेत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयतीति ॥ अन्वयव्यतिरेकाभ्यां
प्रवृत्तिनिवृत्तिकारिवाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैः पदार्थैरन्वितानामेव
संकेतो गृह्यत इति विशिष्टा एव पदार्था वाक्यार्थो न तु पदार्थानां वैशिष्ट्यं ॥ यद्यपि वाक्यांतरे प्रयुज्यमानान्यपि
प्रत्यभिज्ञाप्रत्ययेन तान्येवैतानि पदानि निश्चीयंत इति पदार्थांतरमात्रेणान्वितः पदार्थः संकेतगोचरस्तथापि
सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते ॥ व्यतिषक्तानां पदार्थानां तथाभूतत्वादिति अन्विताभि
धानवादिनः येषामपि मते सामान्यविशेषरूपः पदार्थः संकेतविषय इत्यतिविशेषभूतो वाक्यार्थांतर्गतोसं
केतितत्वादवाच्य एव यत्र पदार्थः प्रतिपद्यते ॥ न तत्र दूरे र्थांतरभूतस्य निःशेषच्युतेत्यादौ विध्यादेश्चर्चा ॥ अन
न्वितोर्थोभिहितान्वये पदार्थांतरमात्रेणान्वितस्त्वन्विताभिधाने अन्वितविशेषस्त्ववाच्य एवेत्युभयनयेप्य
पदार्थ एव वाक्यार्थः ॥ यदप्युच्यते ॥ नैमित्तिकानुसारेण निमित्तानि कल्प्यंत इति ॥ तत्र निमित्तत्वं कारकत्वं ज्ञा
पकत्वं वा ॥ शब्दस्य प्रकाशकत्वान्न कारकत्वं ॥ ज्ञापकत्वं ज्ञातस्य कथं ज्ञातत्वं च संकेतेनैव ॥ स चान्वितमात्रे ॥राम॥
एवं च निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य प्रतीतिरेव कथमिति नैमित्तिका या ॥२३॥

नुसारेणनिमित्तानिकल्प्यंतइति ॥ श्रुतिचारिताभिधानंयेत्वभिदधतिसोयमिषोरिवदीर्घदीर्घोव्यापारइतिय
त्परःशब्दःसशब्दार्थइतिविधिरेववाच्यइतितेतात्पर्यज्ञाः ॥ तादतात्पर्यवाचोयुक्तेर्देवानांप्रियाः ॥ तथाहि ॥ भू
तभव्ययसमुच्चारणेभूतंभव्यायोपदिश्यतइतिकारकपदार्थाःक्रियापदार्थेनान्वीयमानाःप्रधानक्रियाभिनि
र्वर्तकस्वक्रियाभिसंबंधात्साध्यायमानतांप्राप्नुवंति ॥ ततश्चादग्धदहनन्यायेनयावदप्राप्तंतावद्विधीयते ॥ यथा
ऋत्विक्प्रचरणेप्रमाणांतरात्सिद्धेलोहितोष्णीषाऋत्विजःप्रचरंतीत्यत्रलोहितोष्णीषत्वमात्रंविधेयं ॥ हवनस्या
न्यतःसिद्धेः ॥ दध्नाजुहोतीत्यादौदध्नादेःकरणत्वमात्रंविधेयं ॥ क्वचिदुभयविधिःक्वचित्त्रिविधिरपि ॥ यथारक्तं
पटंवयेत्यादौएकविधिर्द्विविधिस्त्रिविधिरिति ॥ ततश्चयदेवविधेयंतत्रैवतात्पर्यंनतुप्रतीतमात्रे ॥ एवंहिपूर्वोधा
वतीत्यादावपरार्थेपिक्वचित्तात्पर्यंस्यात् ॥ यत्तुविषंभक्षयमाचास्यगृहेभुंक्ष्वइत्यत्रचैतद्गृहेनभोक्तव्यमितित
त्रतात्पर्यमितिसएववाक्यार्थइत्युच्यते ॥ तत्रचकारएकवाक्यतासूचनार्थः ॥ नचाख्यातवाक्ययोर्द्वयोरंगांगिभाव
इतिविषभक्षणायाभ्यस्यसुहृदाकेनांगभावःकल्पनीयइति ॥ विषभक्षणादपिदुष्टमेतद्गृहेभोजनमितिसर्वथा
मास्यगृहेभुंक्ष्वइत्युपात्तशब्दार्थएवतात्पर्यं ॥ यदिचशब्दश्रुतेरनंतरंयावानर्थोलभ्यतेतावतिशब्दस्याभिधे
यव्यापारःतत्कथंब्राह्मणपुत्रस्तेजातोब्राह्मणकन्यातेगर्भिणीत्यादौहर्षशोकादीनामपिनवाच्यत्वं ॥ कस्मा
च्चलक्षणालक्षणीयेप्यर्थेदीर्घदीर्घाभिधाव्यापारेणैवप्रतीतिसिद्धेःकिमितिचश्रुतिलिंगवाक्यप्रकरण

स्थानसमाख्यानो पूर्वपूर्ववंशीयस्त्वमर्थ्यैविप्रकर्षीदित्यन्वितामिधानवादेपिविधेयपिसिद्धं व्यं
ग्यं॥ किंचकुरुरुचिमितिपदयोर्विपरीत्येकाव्यांतरवर्तिनिकष्टंदुष्टत्वं॥ नन्वस्त्रनासम्भोऽर्थः पदार्थातिरे
कान्वितःस्यात्पनविधेयस्यैवेत्येवमाद्यपरित्यागःस्यात्॥ यदिचवाच्यवाचकभावव्यतिरेकेणव्यंग्यव्यंज
कभावोनाभ्युपेयतेतदसाधुत्वादीनांनित्यदोषत्वंकष्टत्वादीनामनित्यदोषत्वमितिविभागकरणमनु
पपन्नंस्यात्॥ नचानुपपन्नंसर्वस्यैवविभक्ततयाप्रतिभासात्॥ वाच्यवाचकभावव्यतिरेकेणव्यंग्यव्यंज
काश्रयरोत्तुव्यंग्यस्यबहुविधत्वात्॥ क्वचिदेवकस्यचिदेवदोषत्वेनोपपद्यतेविभागव्यवस्था॥ दृष्टंगतं
संप्रतिसोचनीयतांसमागमप्रार्थनयाकपालिनइत्यादौपिनाकप्रादिपदवैलक्षण्येनकिमितिकपालस्या
दिपदानांकाव्यानुगुणत्वं॥ अपिचवाच्योऽर्थःसर्वान्प्रतिप्रतिपत्तॄन्प्रतिएकरूपएवनियतोऽसौ॥ नहिगतोऽस्तम
र्कइत्यादौवाच्योऽर्थःक्वचिदन्यथाभवति॥ प्रतीयमानस्तुतत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतयाना
नात्वंभजते॥ तथाचगतोऽस्तमर्कइत्यतःसंपन्नप्रत्यवस्कन्दनावसरइतिअभिसरणमुपक्रम्यतामितिप्राप्तप्राय
स्तेप्रियानितिकर्मकरणान्निवर्त्तामहइति॥ संध्याविधिरुपक्रम्यतामितिवक्रयाकोऽपिविमुक्तोभविष्यति॥ दूरंमागा
इतिसुरभयोगृहंप्रवेश्यतामितिसंतापोऽधुनानभवतीतिविक्रेयवस्तूनिसमाहियंतामितिनागतोऽद्यापिप्रियानितिसा

ध्यनवधिः व्यंग्योर्थः स्तत्र तत्र प्रतिभाति ॥ वाच्यव्यंग्ययोर्निःशेषेत्यादौ निषेधविध्यात्मना ॥ मात्सर्यमुत्सार्य नि
चार्य कार्यमार्याः समर्यादमुदाहरंतु सेव्याः नितंबाः किमु भूधराणामुत स्मरस्मेरविलासिनीनामित्यादौ संशयशांत
शृंगार्यन्यतरगतिनिश्चयरूपेण ॥ कथमवनिपदर्पो यन्निशातासिधारादलनगलितमूर्द्ध्ना विद्विषां स्वीकृता
श्रीः ॥ ननु तव निहितारे राप्यसौ किं न नीता त्रिदिवमपगतांगैर्वल्लभा कीर्तिरेभिरित्यादौ निंदास्तुतिवपुषा स्वरू
पस्यापूर्वपश्चाद्भावेन प्रतीतेः कालस्य शब्दाश्रयत्वेन शब्दशब्दैकदेशतदर्थवर्णसंघटनाश्रयत्वेन चाश्रयस्य ॥
शब्दार्थशासनज्ञानमात्रेण प्रकरणादिसहायात्प्रतिभानैर्मल्यसहितेन तेन चावगम इति निमित्तस्य बोद्धृविदग्धव्यप
देश्ययोः प्रतीतिमात्रं च मात्सर्य्योऽप्रकरणात्कार्यस्य गतोस्तमर्क इत्यादौ प्रदर्शितनयेन संख्यायाः ॥ कस्स व ण होइ
रोसो दठूण पियाए सव्वणं अहरं ॥ सभमरपउमग्घाइरि वारियवामे सहसु इह्निं ॥ इत्यादौ सखीतत्कांतादिगतत्वेन
विषयस्य च भेदेपि यद्येकत्वं तत्क्वचिदपि नीलपीतादौ भेदो न स्यात् ॥ उक्तं हि ॥ अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्ध
धर्माध्यासः कारणभेदश्चेति ॥ वाचकानामर्थापेक्षा ॥ व्यंजकानां तु न तदपेक्षत्वमपीति न वाचकत्वमेव व्यंजकत्वं ॥
किंच वाणीरकुडंगोड्डीणेत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूप एव यत्र विश्राम्यति तत्र गुणीभूतव्यंग्यो तात्पर्य
भूतोप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलंबतां ॥ ननु रामोस्मि सर्वं सहे र

तिरामेण प्रियजीवितेन नु कृतं प्रस्थाः प्रिये नोचितमिति ॥ रामोसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामित्या
दौ लक्षणीयोर्थो नानात्वं भजते ॥ विशेषव्यपदेशहेतुश्च भवति ॥ न तदवगमश्शब्दार्थायत्तः प्रकरणादिस
व्यपेक्षत्वेनिक्षेपं भूतनः प्रतीयमानो नाम ॥ उच्यते ॥ लक्षणीयस्यार्थस्य नानात्वेपि अनेकार्थशब्दाभिधेयव
न्नियतत्वमेव ॥ न खलु मुख्येनार्थेनानियतसंबंधो लक्षयितुं शक्यते ॥ प्रतीयमानस्तु प्रकरणादिविशेषवशे
न नियतसंबंधः अनियतसंबंधः संबंधसंबंधश्च द्योत्यते ॥ न च अत्ताएत्थ णुमज्जइ एत्थ अहं दिअसअं पलोए
हि ॥ मा पहिअ रत्तिअंधअ सेज्जाए मह णुमज्जिहीसि ॥ इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाध
स्तत्कथमत्र लक्षणा ॥ लक्षणायामपि व्यंजनमवश्यमाश्रयितव्यमिति प्रतिपादितं ॥ यथा च ॥ समयसव्यपे
क्षाभिधानतया मुख्यार्थबाधादित्रयसमयविशेषसव्यपेक्षा लक्षणा ॥ अत एवाभिधापुच्छभूतासेत्याहुः
न च लक्षणात्मकमेव ध्वननं ॥ तदनुगमेन तस्य दर्शनात् ॥ न च तदनुगतमेवाभिधावलंबेनापि तस्य भावात्
न चोभयानुसार्येव ॥ अवाचकवर्णानुसारेणापि तस्य दृष्टेः ॥ न च शब्दानुसार्येव ॥ अशब्दात्मकनेत्रविभागा
वलोकनादिगतत्वेनापि तस्य प्रसिद्धेरित्यभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्या
यो व्यापारोऽनपह्नवनीय एव ॥ तत्र अत्ता एत्थेत्यादौ नियतसंबंधः ॥ कस्स वण होइ रोसो इत्यादावनियतसं
बंधः ॥ विवरीअरए लच्छी वह्मं दट्ठूण णाहिकमलत्थं ॥ हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ ॥ इत्यादौ सं

वं घसे वं घः ॥ अत्रहि हरि पदेन दक्षिण नयनस्य सूर्यात्मता ख्याप्यते ॥ तन्निमीलनेन सूर्यास्तमयः तेन पद्म
स्य संकोचः ॥ न नो पि वृत्तता: स्पगनं ॥ न च समनि गोष्यं यस्मादर्शनेन निरयत्र यनि धु वनशिलसि तं ॥ अपरं ड धुद्धि
निर्ग्री द्वा वा च्यार्थ एव वाच्यो वाक्यमेव वाचकमिति ॥ ये प्याहुः स्तेरप्यविद्यापदपातितेः पद पदार्थ कल्पनाक्रम
यो वे निनत्प के प्य व स्प मुक्तो दाहरणा दो वि ष्या दि र्थो प्येव ॥ ननु वाच्यादसंवेद्य ॥ ताचान्न प्रतीयते ॥ यतः कुनश्चि
घस्य कस्यापि दर्पस्य प्रतीतेः प्रसंगात् ॥ एवं चसंवेधात् व्यंग्य व्यंजकभावोप्रतिवंधे ऽयरुषं न भवतीति व्याप्तित्वेन
नियत धर्मि निष्ठत्वेन च त्रिरूपत्वाल्लिंगात्तल्लिंगिनि ज्ञानमनुमानं यत्तद्रूपः पर्यवस्यतीति ॥ तथाहि ॥ भम धम्मिअ
वीसद्धो सो सुणओ ॥ अज्ज मारिओ ॥ देण ॥ गोलाणइ कच्छ कुडंग वासिणा दरिअ सीहेण ॥ गृह गरहे ध्वनि रत्वा भ्र
मणं विहितं गोदावरी तीरे सिंहोपलब्धेर भ्रममनुमापयति ॥ य य द्भीरुभ्रमणं तत्सद्भयकारणानिवृत्युपलब्धिपूर्व
क हृष्टं ॥ गोदावरी तीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः ॥ अत्रोच्यते ॥ भीरुरपि गुरोः प्रभोर्वा निर्देशे
न प्रियानुरागेणान्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनेनानैकांतिको हेतुः शुनो विभ्यदपि धीर
त्वेन सिंहान्न विभीतीति विरुद्धोपि ॥ गोदावरी तीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितोपि तु वचनात् ॥ न च वचन
स्य प्रामाण्यमस्ति ॥ अर्थेनाप्रतिवंधादिति असिद्धश्च ॥ तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः ॥ तथा निःशेषच्युते
त्यादौ गमकत्वाद्या यानि चंदनच्यवनादीन्युपात्तानि तानि कारणांतरतोपि भवंति अतश्चात्रैव स्नानकार्यत्वेनो

कानीति नोपभोग एव प्रतिबद्धा निरतिशयानेकांतिकानि ॥ व्यक्तिवादिनाचाधमपदसहायानामेवां व्यंजकत्वमु
क्तं ॥ नचाधमत्वं प्रमाणप्रतिपन्नमिति कथमनुमानं ॥ एवंविधादर्थादेवंविधोर्थ उपपत्त्यनपेक्षत्वेपि प्रकाश
ते इति व्यक्तिवादिनं पुनः स्त दूषणं ॥ ॥ इति काव्यप्रकाशे ध्वनिगुणीभूतव्यंग्यसंकीर्णनिर्णयो नाम पंचमउ
ल्लासः ॥ शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतं ॥ गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ॥ ननु शब्दचि
त्रेप्यर्थस्यापि चित्रत्वं अर्थचित्रे वा शब्दस्य ॥ तथोक्तं ॥ रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः ॥ नकांतमपि नि
र्भूषं विभाति वनितानन ॥ रूपकादिमलंकारं बाह्यमाचक्षते परे ॥ सुपांतिङां च व्युत्पत्तिं वाचां वांछंत्यलंकृतिं ॥ तदे
तदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ॥ शब्दाभिधेयालंकारभेदादिष्टं न जुद्वयं इति ॥ शब्दचित्रं यथा ॥ प्रथममरुण
छायस्तावत्ततः कनकप्रभस्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ॥ उदयति ततो ध्वांतध्वंसक्षमः क्षणदासरस
बिसिनीकंदछेदछविर्मृगलांछनः ॥ अर्थचित्रं यथा ॥ ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशाम
लकाः खलाश्च ॥ नीचाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतामिव न त्यजंति ॥ यद्यपि सर्वत्र का
व्येंतो विभावादिरूपतया रसपर्यवसानं तथापि स्फुटस्य रसस्यानुपलंभादव्यंग्यमेतत्काव्यद्वयमुक्तं ॥ अत्र च
शब्दार्थालंकारभेदाद्बहवो भेदास्ते चालंकारनिर्णये निर्णेष्यंते ॥ ॥ इति काव्यप्रकाशे षष्ठ उल्लासः ॥ काव्यस्य
रूपं निरूप्यादोषाद्यात्मकं समान्यलक्षणमाह ॥ मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः ॥ उभयोपयोगिनः स्युः
शब्दाद्यास्तेन तेष्वपि सः ॥ हतिरपकर्षः ॥ शब्दाद्याद्यस्यादिग्रहणाद्वर्णरचनेग्रहस्तेनेति विशेषलक्षणमाह ॥ दुष्टं पदं श्रु

तिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थं निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं ॥ संदिग्धमप्रतीतं ग्राम्यं नेया
र्थमथभवेत्क्लिष्टं ॥ अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव ॥ श्रुतिकटु परुषवर्णमयं ॥ दुष्टं यथा ॥ अनंग
मंजुलगृहापांगभंगितरंगितैः ॥ आलिंगितः स तन्व्ंग्या सकार्तार्थ्यं लभते कदा ॥ अत्र कार्तार्थ्यमिति ॥ च्युतसंस्कृति व्या
करणलक्षणहीनं ॥ यथा ॥ एतन्मंदविपक्वतिंदुकफलश्यामोदरापांडुरप्रांतं हंत पुलिंदसुंदरकरस्पर्शक्षमं लक्ष्यते ॥ त
त्पल्लीपतिपुत्रिकुंजरकुलं कुंभाभयाभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥ अत्र नाथत इति ॥ सर्पिषो
नाथत इत्यादौ आशिष्येव नाथतेरात्मनेपदं नियमितं ॥ आशिषि नाथ इति ॥ अत्र तु याचनमर्थस्तस्मादनुनाथति स्तन
मिति पठनीयं ॥ अप्रयुक्तं यथाम्नातमपि कविभिर्नादृतं ॥ यथा ॥ यथायं दारुणाचारः सर्वदैव विभाव्यते ॥ तथा मन्ये दै
वतोस्य पिशाचो राक्षसोथवा ॥ अत्र दैवतानि पुंसि वेत्याम्नातेपि न केनचित्प्रयुज्यते ॥ असमर्थं यत्पदार्थं प्रयुज्यते ॥ तेन
न६ च न तत्रास्य शक्तिः ॥ यथा ॥ तीर्थांतरेषु स्नानेन समुपार्जितसत्कृतिः ॥ सुरस्रोतस्विनीमेव हंति संप्रति सादरं ॥ अत्र हंतीति
गमनार्थं ॥ निहतार्थं यदुभयार्थमप्रसिद्धार्थे प्रयुक्तं ॥ यथा ॥ यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन ॥ मुग्धा
साध्वसतरलाविलोक्य परिचुंबिता सहसा ॥ अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्वलीकृतरूपार्थोव्यव
धीयते ॥ अनुचितार्थं यथा ॥ तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या ॥ प्रयांति तामाशुगतिं
विपश्चितो रणाश्वमेधे पशुतामुपागताः ॥ अत्र पशुपदं कातरतामभिव्यनक्ति ॥ इत्यनुचितार्थं ॥ निरर्थकं पूरण
मात्रप्रयोजनं चादिपदं ॥ यथा ॥ उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ॥ अभिवांछितं प्रसिद्ध्यतु भगवति युष्म

॥का॰प्र॰॥
॥२७॥ त्प्रसादेन ॥ अत्र हि शब्दः ॥ अवाचकं यथा ॥ अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः ॥ अमर्षशू
न्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः ॥ अत्र जंतुपदमदातर्यर्थे विवक्षितं ॥ न च तत्राभिधायकं ॥ यथा वा
हा धिक्सा किल तामसी शशिमुखी दृष्टा मया यत्र सा ॥ तद्विच्छेदरुजांधकारितमिदं दग्धं दिनं कल्पितं ॥ किं कुर्मः कुश
ले सदैव विधुरो धाता न चेत्तत्कृतं तादृग्यामवतीमयो भवति मे नो जीवलोकोधुना ॥ अत्र दिनमिति प्रकाशमयमित्य
र्थेवाचकं ॥ पद्योपसर्गसंसर्गदर्पीनरंगतं ॥ यथा ॥ जंघाकांडोरुनालो नखकिरणलसत्केसरालीकरालः प्रत्यग्रा
लक्तकाभाप्रसरकिसलयो मंजुमंजीरभृंगः ॥ भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापीसंभूतांभोज
शोभां विदधदभिनवो दंडपादो भवान्याः ॥ अत्र दधदित्यत्रार्थे विदधदिति ॥ त्रिधेति ॥ व्रीडाजुगुप्सामंगल
व्यंजकत्वात् ॥ साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ॥ तस्य धीशालिनः कोन्यः सहेताशादिनभ्रुवां ॥ लीलातामर
साहतोन्यवनितानिःशंकदष्टाधरः ॥ कश्चित्केशरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ॥ मुग्धा कुड्मलिताननेन
नदधती वायुं स्थिता तस्य सा भ्रांत्या धूर्ततया प्रणतिमृते तेनैव सा निःसं चुंबिता ॥ मृदुपवनविभिन्नो मत्प्रियाया विना
शाद्घनरुचिरकलापो निःसपत्नोद्य जातः ॥ रतिविगलितबंधे केशपाशे सुकेश्याः सति कुसुमसनाथे कं हरेदेष
बर्ही ॥ रतसाधनवायुविनाशाः व्रीडादिव्यंजकाः ॥ संदिग्धं यथा ॥ आलिंगितस्तत्रभवान्संपराये जयश्रिया ॥ आ
शीःपरंपरां वंद्यां कर्णे कृत्वा कृपां कुरु ॥ अत्र वंद्यां कावां किं नमस्यामिति संदेहः ॥ अप्रतीतं यत्केवलं शास्त्रे प्रसि
द्धं ॥ यथा सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः ॥ विधीयमानमप्येतन्न भवेत्कर्मबंधनं ॥ अत्राशयशब्दो वास
नापर्यायो योगशास्त्रे प्रसिद्धः ॥ ग्राम्यं यत्केवलं लोके स्थितं यथा ॥ राकाविभावरीकांतसंक्रांतद्युति ते मुखं ॥ तपनी ॥राम॥
॥२७॥

यशिलाशोभा कटि अग्रहस्ते मनः ॥ अत्र कटिरिति नेपार्थं कोप्यन्यैव त्वशक्तिनृशंसि यन्निर्यद्विदितेन ह्यालोकं ॥ य
था ॥ शरत्कालसमुद्भासिपूर्णिमाशर्वरीप्रियं ॥ करोति ते मुखं तन्वि चपेटापातनातिथिं ॥ अत्र चपेटापातनेनेति
निर्जितत्वं लक्ष्यते अत्र हंसमांसगानमे वदुष्टमिति सवंधः ॥ अन्यत्र केवलं हंसमांसगतं बालिकावं यतो प्रयुक्ति पनि
र्य विहिता ॥ यथा ॥ भूतेलोचनसंभूतज्योतिरुद्गमभासिभिः ॥ सदृशं शोभतेत्यर्थं भूपालतव चेष्टितं ॥ अत्र
त्रिलोचनसंभूतस्य चंद्रस्य ज्योतिरुद्गमनेन भासिभिः कुमुदैरित्यर्थः ॥ अविमृष्टविधेयांशं ॥ प्राधान्येनाविमृष्ट
विधेयांशो यत्र ॥ स यथा ॥ मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजयजगज्जा
तमिथ्यामहिम्नां ॥ कैलासोद्धासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फल
मिह नगरीरक्षणे यत्प्रयासः ॥ अत्र मिथ्यामहिमत्वं नानुवाद्यं ॥ अपितु विधेयं ॥ यथा च ॥ स्रस्तां नितंबादव
लंबमानां पुनः पुनः केशरदामकांचीं ॥ न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥ अत्र
मौर्वी द्वितीयामिति द्वितीयत्वमात्रमुत्प्रेक्ष्यं ॥ यथा ॥ वपुर्विरूपाक्षमलक्ष्यजन्मता दिगंबरत्वेन निवेदितं वसु
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥ अत्रालक्षिता जनिरिति वाच्यं ॥ यथा च ॥ आनं
दसिंधुरतिचापलशालि चित्तसंदाननैकसदनं क्षणमप्यमुक्ता ॥ या सर्वदैव भवता तदुदंतचिंतातांतिं तनो
ति तव सं प्रति धिग्धिगस्मात् ॥ अत्र न मुक्तेति निषेधो विधेयः ॥ यथा ॥ नवजलधरः सन्नद्धोयं न दृप्तनिशाच

र:॥सुरधनुरिदं दूराकृतं न दुष्टशरासनं॥ अयमपि पटुर्द्धारासारो न बाणपरंपरा कनकनिकषस्निग्धा विद्युत्प्रि
यानमोमोर्वशी॥ इत्यत्र न तत्वमुक्त्वा नानुवादेन तत्किंचिद्विहितं॥ यथा॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुर:
अगृध्नुराददे सोर्थानशक्त: सुखमन्वभूत॥ अत्रात्रस्तत्वाद्यनुवादेनात्मनो गोपनादि॥ विधेयमतिकृतं॥ यथा॥
सुधाकरकराकारविशारदविचेष्टित:॥ अकार्यमित्रमेकोसौ तस्य किं वर्णयामहे॥ अत्र कार्यं विना मित्रमिति वि
वक्षितं॥ अकार्ये मित्रमिति तु प्रतीति:॥ यथा च॥ चिरकालपरिप्राप्तिलोचनानंददायिन:॥ कांताकांतस्य सहसा
विदधाति गलग्रहं॥ अत्र कंठग्रहमिति वाच्यं॥ यथा॥ न त्रस्तं यदि नाम भूतकरुणासंतानशांतात्मनस्तेन व्यारुजता
धनुर्भगवतो देवाद्भवानीपते:॥ तत्पुत्रस्तु मदांधतारकवधाद्विश्वस्य दत्तोत्सव: स्कंद: स्कंदरवप्रियोहमथ
वा शिष्य: कथं विस्मृत:॥ अत्र भवानीपतिशब्दो भवान्या: पत्यंतरे प्रतीतिं करोति॥ यथा च॥ गोरपि यद्वाहनतां प्रा
प्तवत: सोपि गिरिसुतासिंह:॥ सविधे निरहंकार: पायाद्व: सोंबिकारमण:॥ अत्राम्बिकारमण इति विरुद्धं धियमु
त्पादयति॥ श्रुतिकटु समासगतं॥ यथा॥ सा दूरे च सुधासांद्रतरंगितविलोचना॥ बर्हिनिर्ह्लादनार्होयं कालश्च समु
पागत:॥ एवमन्यदपि ज्ञेयं॥ अपास्य च्युतसंस्कारमसमर्थं निरर्थकं॥ वाक्येपि दोषा: संत्येते पदस्यांशेपि केचन॥
केचन न पुन: सर्वे किमेषामुदाहरणानि॥ श्रुतिकटु॥ सोध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत् सममंस्त बंधून्
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥ अप्रयुक्तं॥ सदा नु देवो दुम्भ्यवनोभाभिका नो परंपरां॥ अपने उमूत्र

तान्येभ्यश्च्युतदोषैरसंमतान् ॥ अत्र चदश्च वनरंद्धः अनेऽमूकोमूकवधिरः ॥ निहतार्थं ॥ सायकसहायबाहोर्मकरध्वज
नियमितक्षमाधिपतेः ॥ अब्जरुचि भास्वरस्ते भातितरामवनिप श्लोकः ॥ अत्र सायकादयः शब्दाः खड्गादिभूचंद्रपर्या
याः शरार्थतया प्रसिद्धाः ॥ अनुचितार्थं ॥ कुविंदस्त्वं तावत्पटयसि गुणग्राममभितो यशो गायंत्येते दिशि दिशि च नग्ना
स्तव विभो ॥ शरज्ज्योत्स्नागौरस्फुटविकटसर्वांगसुभगा तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह ॥ अत्र कुविंदादि
शब्दोऽर्पितरंप्रतिपादयन्नुपश्लोक्यमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थः ॥ अवाचकं ॥ प्राभ्रभ्राड्विष्णुधामापि विषमा
श्वः करोत्ययं ॥ निद्रां सहस्रपर्णानां पलायनपरायणां ॥ अत्र प्राभ्रभ्राड्विष्णुधामविषमाश्वनिद्रापर्णशब्दाः प्रकृष्टजलदग
मनसकाशवसंकोचपत्रपलायनमवाचकाः ॥ त्रिधाश्लीलं ॥ भूपतेरुपसर्पंती कंपना वामलोचना ॥ तत्तत्प्रहरणा नोत्साहव
तीमोहनमादधौ ॥ अत्रोपसर्पणप्रहरणमोहनशब्दाः व्रीडादायित्वादश्लीलाः ॥ तेऽन्यैर्वांतं समश्नंति परोत्सर्गं च भुंजते ॥ इतरा
र्थग्रहे येषां कवीनां स्यात्प्रवर्तनं ॥ अत्र वांतोत्सर्गप्रवर्तनशब्दाः जुगुप्सादायिनः ॥ पितृवसतिमहं व्रजामि तां सह परिवारज
नेन यत्र मे भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकं ॥ अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतीता
वमंगलार्थत्वं ॥ संदिग्धं ॥ सुरालयोल्लासकरः प्राप्तवर्यो मकंपनः ॥ मार्गणप्रवणो भास्वद्भूतीरेष विलोक्यतां ॥ अत्र सुरा
दिशब्दाः किं देवसेनाशरविभूत्यर्थाः ॥ किं मदिराद्यर्था इति संदेहः ॥ अप्रतीतं ॥ तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः
दृढभूमिः प्रियप्राप्तौ यत्नः सफलितः सखे ॥ अत्राधिमात्रोपायादयः शब्दाः योगशास्त्रमात्रप्रयुक्तत्वादप्रतीताः ॥ ग्राम्यं

तांबूलभृतगल्लोयं भल्लं जल्पति मानुषः ॥ करोति खादनं पानं सदैव तु यथा तथा ॥ अत्र भल्लादयः शब्दा ग्रा
म्याः ॥ नेयार्थं ॥ वस्त्रवैडूर्यचरणैः क्षतसत्वरजः परं ॥ निःकंपा रचिता नेत्रयुग्मं बोधय सांप्रतं ॥ अत्रांबरत्वप
दे निहततमात्र चलाभूः कृता नेत्रद्वंद्वं बोधयेति नेयार्थता क्लिष्टं ॥ धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरंगशा
वाक्ष्याः ॥ रजत्यपूर्वबंधव्युत्पत्तेर्मानसं शोभां ॥ अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति संबंधे
क्लिष्टत्वं ॥ न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः सोप्यत्रैव निहंति राक्षसकुलं जीवत्यहो रावणः ॥ धि
ग्धिक् शक्रजितं प्रबोधितवता किं कुंभकर्णेन वा स्वर्गग्रामटिकाविलुंठनवृथोच्छूनैः किमेभिर्भुजैः ॥ अत्रायमे
व न्यक्कार इति वाच्यं ॥ उक्तमत्यमात्रं त्वनुवाद्यं न त्वपात्वं विशेषितं ॥ अत्र शब्दरचना विपरीता कृतेति वाक्यस्यै
व दोषो न वाक्यार्थस्य ॥ यथा वा ॥ अपांगसंसर्गितरंगितं दृशोर्भ्रुवोररालांतविलासि वेल्लितं ॥ विसारि रोमांचितकंचु
कं तनोस्तनोति योसौ सुभगेन वागतः ॥ अत्र योसाविति पदद्वयमनुवाद्यविधेयार्थतया विदक्षितमनुवाद्यमा
त्रप्रतीतिकृत् ॥ तथाहि ॥ प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते ॥ क्रमेण उदाहरणानि ॥ कातर्यं
केवला नीतिः शौर्यं श्वापदचेष्टितं ॥ अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ द्वयं गतं संप्रति शोचनीयतां समा
गमप्रार्थनया कपालिनः ॥ कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ उत्कंपिनी भयपरिस्खल
ितांशुकांता ते लोचने प्रतिदिशं विधुरे क्षिपंती ॥ क्रूरेण दारुणतया सहसैव दग्धा धूमांधितेन दहनेन न वीक्षि

तासि॥ यच्छब्दस्तूत्तरवाक्यार्थंगतत्वेनोपात्तः सामर्थ्यात्पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षते॥ य
था॥ साधु चंद्रमसः पुष्करैः॥ कृतं मीलितं यदभिरामताधिके॥ उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः
प्राग्युपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकांक्षः॥ यथा॥ श्लोके ऽव्ययपदयोर्व्यत्यासे द्वयोरुपादाने तु निराकां
क्षत्वं प्रसिद्धं॥ अनुपादाने तु द्वयमपि सामर्थ्यात्क्वचिदवगम्यते॥ यथा॥ ये नाम केचिदिह नः प्रथयंत्यवज्ञां जानंति ते किम
पि तान्प्रति नैष यत्नः॥ उत्पत्स्यते ऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ अत्र यः उत्पत्स्यते तं प्र
तीति एवं तत्तच्छब्दानुपादाने न साकांक्षत्वं न वा साविति तत्र शब्दार्थमाह॥ प्रसीमरुद्भुंबित चारुकेशरः प्रसन्नताराधिप
मंडलाग्रणीः॥ वियुक्तरामातुरदृष्टिवीक्षितो वसंतकालो हनुमानिवागतः॥ अत्र न हि तत्तच्छब्दार्थप्रतीतिः प्रतीतो वा॥ कर
वालकरालदोः सहायो युधि योऽसौ विजयार्जुनैकमल्लः॥ यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात्॥ अत्र स
इत्यस्यानर्थकत्वं भवेत्॥ अपयोवि कल्पमिदमर्थमंडलं पश्यती सा निखिलं भवद्वपुः॥ त्वत्मपक्षापरिपूर्तिजगत्यस्य नित्य
मुखिनः कुतो भयं॥ इतीदं शरदवदद॥ शब्दस्तच्छब्दार्थमभिधत्त इति तच्यते॥ तदर्थत्रेव वाक्यांतर उपादानमर्हति नत्वेव
वा॥ यच्छब्दस्य हि निकटे स्थितः स तच्छब्दः प्रसिद्धिं परामृशंति॥ यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः॥ दीव्यताक्षैस्त
दानेन नूनं तदपि हारितं॥ इत्यत्र तच्छब्दः॥ ननु कथं॥ कल्याणानां त्वमसि महसा मीशिषे त्वं धिचेत्से पुरा [illegible] लक्ष्मीमय
मपि हृदस्यां चेहि देव प्रसीद॥ यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे भद्रं भद्रं वितर भगवन्भूयसे मंगलाय॥ अत्र य
यदित्युक्त्वा तन्मे इत्युक्तं॥ उच्यते॥ यच्छब्द इति येन केनचिद्व्यवस्थितं सर्वात्मकं वस्तु वा [illegible]॥ तथा भूतमेव तच्छब्देन परामृ

रयते॥ नयथा॥ किं भोते न विलंघितः सभरतोयेनैनदेवं रुतं भ्राताख्यीलघुतांगतात्किमथवामामेवमेमध्यम॥ मिथ्येत
न्ममर्चिंतितंदृहितयमयौवीयानुजोसौगुरुर्मीतातानकलत्रमित्यनुचितं मन्येविद्याताद्रूतं॥ अत्रार्यस्येति तातस्येति
चवाच्यंनत्वनयोः॥ समासेगुणीभावः कार्यः॥ एवंसमासांतरेष्वप्युदाहार्यं॥ भिन्नलक्षमारककुभः॥ शिवालिंगि
तमूर्तयः॥ विग्रहंदक्षपरोनावशेरतेतेगतासुखाः॥ अत्रदक्षमाध्विगुणयुक्ताः सुखमासनरतितिविवक्षितेहताइति
भिन्नलक्षप्रतीतिः॥ पदैकदेशेयथासंभवं॥ क्रमेणोदाहरणं॥ अमलमतिचपलत्वात्स्वप्रमायापमत्वात्परिणाति
विरसत्वात्संगमेनप्रियायाः॥ इतियदिशतकृत्वस्तत्वमालोचयामस्तदपिनहरिणाक्षीं विस्मरत्यंतरात्मा॥ अत्र
त्वात्वादिति॥ यथावा॥ नजहासिसक्षोकुरुदेवकार्यमथौयमर्थातिरत्नम्प्यएव॥ अपेक्षते प्रत्ययमंगलध्येवीजांकुरः
प्रागुदयादिवांभः॥ अत्रलक्षेअहरितिकवं॥ पश्चात्पस्तरोविभ्रममंडनानांसंपादयिन्त्री शिखरैर्विभाति॥ बलाहकच्छेद
विभक्तरागामकालसंध्यामिवधातुमत्तां॥ अत्रमनाशब्दः सीवार्थेन निहतार्थः॥ अदावंजनपुंजलिप्तवपुषो
श्वासानिलोल्लासितप्रोसर्पद्विरहानलेनलेन च ततः संतापितानां दृशां संप्रत्येव निषेकमश्रुपयसादेवस्य चेतो
भुवोभल्लीनामिवपानकर्मकुरुतेकामं कुरंगेक्षणा॥ अत्रदृशामिति॥ बहुवचनंनिरर्थकं॥ कुरंगेक्षणायाएक
स्या एवोपादानात्॥ नचअलसवलितैः प्रेमार्द्रार्द्रैः इत्यादिवद्व्यापारभेदाद्बहुत्वं॥ व्यापाराणामनुपात्तत्वात्॥
नचव्यापारेत्र हलेशद्योतितं॥ अत्रैकंकुरुतेरत्यात्मनेपदमप्यनर्थकं॥ प्रधानक्रियाकालस्यकर्तृत्वं वंधेके.
ननुभिप्रायक्रियाफलाभावात्॥ चापाचार्यस्त्रिपुरविजयीकार्त्तिकेयोविजेयः शस्त्रव्यस्तः सदनमुदधिर्भूरियंहं

5.8

तकारः ॥ अस्त्येवैतत्किमु कृतवता रेणुकाकंठबाधां वद्धस्पर्द्धस्तव परशुना लज्जते चंद्रहासः ॥ अत्र विधेये
यत्तिरूत्यप्रत्ययः ॥ क्तप्रत्ययार्थेऽवाचकः ॥ अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ॥ परमा
र्थतः सहृदयं वहति पुनः कालकूटघटितमिव ॥ अत्र पेलवशब्दः ॥ यः पूयते सुरसरिन्मुखतीर्थसार्थस्नानेन शा
स्त्रपरिशीलनकीलनेन ॥ सौजन्यमानजनिरूर्जित ऊर्जितानां सोयं दृशोः पतति कस्यचिदेव पुंसः ॥ अत्र पूय
शब्दः ॥ विनयप्रणयैककेतनं सततं योऽभवदंग ताहशः ॥ कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥ अत्र
प्रेतशब्दः ॥ कस्मिन्कर्मणि सामर्थ्यमस्य नोत्पद्यते तरां ॥ अयं साधुचरस्तस्मादंजलिर्बध्यतामिह ॥ अत्र किं पूर्वं सा
धुः ॥ उत साधुषु चरतीति संदेहः ॥ किमुच्यतेऽस्य भूपालमौलिमालामहामणेः ॥ सुदुर्लभं वचोवाणैस्तेजो यस्य
विभाव्यते ॥ अत्र वचःशब्देन गीः ॥ शब्दो लक्ष्यते ॥ अत्र खलु न केवलं पूर्वपदं यावदुत्तरपदमपि पर्यायपरिवर्त
नं न क्षमते ॥ जलध्यादौ तूत्तरपदमेव ॥ वडवानलादौ तु पूर्वपदमेव ॥ यद्यप्यसमर्थस्यैवाप्रयुक्तादयः केचन भे
दास्तथाप्यन्यैरलंकारकारैर्विभागेन दर्शिता इति भेदप्रदर्शनेनोदाहृता इति च विभज्योक्ताः ॥ प्रतिकूलवर्णमु
पहतलुप्तविसर्गः विसंधिहतवृत्तं ॥ न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तं ॥ अर्द्धांतरैकवाचकमभव
न्मतयोगमनभिहितवाच्यं ॥ अपदस्थपदसमासं संकीर्णं गर्भितं प्रसिद्धिहतं ॥ भग्नप्रक्रममक्रममतपरार्थं च वा

कप्रमेयतया ॥ रसानुगुणत्वं वर्णानां वक्ष्यते ॥ तद्विपरीतत्वं प्रतिकूलत्वं यथा ॥ अकुंठोत्कंठया पूर्णमाकंठंक
लकंठीमां ॥ कंबुकंठ्याः क्षणं कंठे कुरु कंठार्तिमुद्धर ॥ रौद्रो देशः सोयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ॥ तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वंति मे यद्रामे
ण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥ अत्र हि विकटवर्णत्वं दीर्घसमासत्वं चोचितं ॥ यथा ॥ प्रागप्राप्तनिशुंभ 5·8
शांभवधनुर्द्वैधाविधाविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तंभापविद्धः क्षणात् ॥ उज्ज्वालः परशुर्भवत्व
शिथिलस्फुरत्कंठपीठातिथिर्येनानेन जगत्सु खंडपरशुर्देवो हरः ख्याप्यते यत्र तु न क्रोधस्तत्र चतुर्थपादाभि
धानेत थैव शब्दप्रयोगः ॥ उपहतः उत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत् ॥ धीरो विनीतो निपुणो वराकारो नृपोत्र सः
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥ संधेर्वैरूप्यं विश्लेषोश्लीलत्वं कष्टत्वं च यथा ॥ राजन् विभांति भ
वतः चरितानि इंदोर्द्युतिं दधति यानि रसातलेंतः ॥ धीदोर्बले अतितते उचितार्थवृत्ती आतन्वती विजयसंपदमे
त्य भातः यथा वा ॥ तन्वुदित उदात्तहारिद्युतिस्स्वैरुदयाचलादिवेंदुः ॥ निजवंश उदात्तकांतकांतिर्वत मुक्तामणि
वच्चकास्त्यनर्घ्यः ॥ संहितां न करोमीति स्वेच्छया सकृदपि दोषः ॥ प्रगृह्यादिहेतुकत्वे त्वसकृत् ॥ वेगादुड्डीय गगने च
लंत्यमरचेष्टिताः ॥ अयमृजुपतेपत्रीततो वेचरुचिं कुरु ॥ अत्र द्वयोरश्लीलता ॥ उर्व्यसावत्र तर्वाली मर्वते चार्ववस्थि
तिः ॥ नात्रर्जु युज्यते गंतुं शिरो नमय तन्मनाक् ॥ न हतं लक्षणानुसरणेप्यश्रव्यं ॥ अप्राप्तगुरुभावांतलघु ॥ रसाननुगुणं

च्युतं ॥ यत्र क्रमेणोदाहरणं ॥ अमृतममृतं कः संदेहो मधून्यपि नान्यथा ॥ मधुरमधिकं चूतस्यापि प्रसन्नरसं फलं
सकृदपि पुनर्मध्यस्थः सन्रसांतरविज्जनो वदतु ॥ यदिहान्यत्स्वादु स्यात्प्रियादशनच्छदात् ॥ अत्र यदिहान्यत्स्वा
दु इत्यस्यार्थ्यं ॥ यथा वा ॥ जं परिहरिउं तीरइ मणअं पि ण सुंदरत्तणगुणेण ॥ अह णवर जस्स दोसो पडिवक्खेहिं पि पडि
वन्नो ॥ अत्र द्वितीयतृतीयचरणयोः सकारभकारो ॥ विकसितसहकारतारहारिपरिमलपुंजितगुंजितद्विरेफः ॥ नवकिसलय
चारुचामरश्रीर्हरति मुनेरपि मानसं वसंतः ॥ अत्र हारि प्रमुदितसौरभेति पाठो युक्तः ॥ अन्यास्ता गुणरत्नरोहणभुवो
धन्या मृदन्यैव सा संभाराः खलु तेन्य एव विधिना यैरेष सृष्टो युवा ॥ श्रीमत्कांतिजुषां द्विषां करतलात्स्त्रीणां नितंबस्थ
लात् दृष्टे यत्र पतंति मूढमनसामस्त्राणि वस्त्राणि च ॥ अत्र वस्त्राण्यपीति पाठे लघुरपि गुरुत्वं भजते ॥ हा नृप हा बुध हा
कविबंधो विप्रसहस्रसमाश्रय देव ॥ मुग्धविदग्धसभांतररत्न क्वासि गतः क्व वयं च तवैते ॥ हास्यरसव्यंजकमेवात्र घट
तं ॥ न्यूनपदं यथा ॥ तथाभूतां दृष्ट्वा नृपसदसि पांचालतनयां वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः ॥ विराटस्या
वासे स्थितमनुचितारंभनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥ अत्रास्माभिरिति खिन्न इत्यस्मात्पूर्व
मित्यमिति च ॥ अधिकं यथा ॥ स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंक्रांतनिशातनिशास्त्रतत्त्वः ॥ अविरुद्धसमन्वि
तोक्तियुक्तः प्रतिमल्लास्तमयोदयः स कोपि ॥ अत्राकृतिशब्दः ॥ यथा वा ॥ इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मा
न्मथो विकारः ॥ यदपि च न कृतं नितंबिनीनां स्तनपतनावधि जीवितं रतं वा ॥ अत्र कृतमिति कृतं प्रत्युत प्रक्रमभंग

मावहति ॥ तथा च ॥ यदपि च कुरंगलोचनानामिति पाठे निराकांक्षैव प्रतीतिः ॥ कथितं यथा ॥ सुधिकरतलन्यस्तो
कल्पितस्याः पल्लीलापरिमिलननिमीलत्यां ऊमागेउपाली ॥ सुबन्तकथपकस्य व्यंजयत्यंजसे । यस्मरनरपति
लीलायौवराज्याभिषेकं ॥ स्वत्रजीवेति ॥ पनत्प्रकर्षं यथा ॥ कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः कः
कः कंकमलाकरं विकमलं कर्तुं करी नोद्यतः ॥ के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः सिंहीस्नेहविला
सबद्धवसतिः पंचाननो वर्त्तते ॥ समाप्तपुनरात्तं यथा ॥ क्रेंकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो झंकारो रति
रतिमंजरीमधुलिहां लीलाचकोरीध्वनिः ॥ तन्व्याः कंचुलिकापसारणभुजाक्षेपस्खलत्कंकणक्वाणः प्रेमतनोर्यु
वोनववयोलास्याय वेणुस्वनः ॥ द्वितीयार्द्धगतैकवाचकशेषं प्रथमार्द्धं यथा ॥ मसृणचरणपातं गम्यतां भूः स
दर्भा विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः । तदिति जनकपुत्री लोचनैरश्रुपूर्णैः पथि पथिकवधूभिः शिक्षिता
वीक्षिता च ॥ अभवन्मतइष्टो योगः संबंधो यत्र ॥ येषां ताः सुविशोभदानसरितः पीताः प्रतापोष्मभिर्लीला पा
नभुवश्च चंदनतरुच्छायासु यैः कल्पिताः ॥ येषां हुंकृतयः कृतामरपतिक्षोभाः क्षपाचारिणां किंतैस्त्वत्परि
तोषकारि विहितं किंचित्प्रवादोचितं ॥ अत्र गुणानां परार्थत्वादसंबंधः समत्वात्स्यादित्युक्तनयेन पञ्चम्यभि
धेयानामर्थानां परस्परमसमन्वये येरित्यत्र विशेष्यस्याप्रतीतिरिति ॥ क्षपाचारिभिरिति पाठे युज्यते स
मन्वयः ॥ यथा वा ॥ त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः कलानां सीमानं परमिह युवामेव भजथः

अग्रिपदद्वंद्वं दिक्ष्वातक्षितिस्तुभगे संवदति वामतः शेषंयत्स्याज्जितमिहतदानीं गुणितत्वया ॥ अत्र पदित्यत्र तदिति
तदानीमित्यत्र यदेतिवचनं नास्ति चेत्स्यादितिपुक्तः पाठः ॥ यथा वा ॥ संग्रामांगणसंगते नभ यूना चापे समारोपि
ते देवाकरणीयये नयेन सहसा पश्चात्समासादितं ॥ कोदंडेन शिरः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च की
र्तिरतुलाकीर्त्या च लोकत्रयं ॥ अत्राकरणीनक्रियाकर्मत्वे कोदंडं शरानित्यादि ॥ वाक्यार्थस्यकर्मत्वे कोदंडः शरा इति प्रा
प्तं ॥ नचयच्छब्दार्थस्तद्विशेषणं वा कोदंडादि ॥ नचकेनेत्यादिप्रश्नः ॥ यथा च ॥ चापाचार्यस्त्रिपुरविजयीत्यादौ भा
र्गवस्य निंदायां तात्पर्यं कृतवनेति परं शीघ्रं प्रतीयते ॥ कृतवतरतितु पाठे मनयोगो भवति यथात्र ॥ चत्वारो वयमृ
त्विजः स भगवान्कर्मोपदेष्टा हरिः संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ॥ कौरव्याः पशवः प्रियापरि
भवक्लेशोपशांतिः ॥ फलंराजन्योपनिमंत्रणायरसतिस्फीतं यशोदुंदुभिः ॥ अत्राध्वरशब्दः समासेगुणीभूतइति
नतदर्थः सर्वैः संयुज्यते यथा ॥ जंघाकांडोरुनालो नखकिरणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसर
किसलयो मंजुमंजीरभृंगः ॥ भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापीसंभूतांभोजशोभां विदधद
भिनवोदंडपादो भवान्याः ॥ अत्र दंडपादगता निजतनुः प्रतीयते ॥ भवानीसंबंधिनी तु विवक्षिता ॥ अवयवव
नमनुक्तं यत्र ॥ अप्राकृतस्य चरितातिशयैश्च दृष्टेरत्यद्भुतैर्ममहृतस्य तथापि नास्था ॥ कोप्येषवीरशिशुका
कृतिरप्रमेयमाहात्म्यसारसमुदायमयः पदार्थः ॥ अत्रापहृतोस्मीति प्रपहृतत्वस्य विधिर्वाच्यः ॥ तथापीत्यस्य
द्वितीयवाक्यगतत्वेनैवोपपत्तेः ॥ यथा च ॥ एषोहमद्रितनयामुखपद्मजन्मा प्राप्तः सुरासुरमनोरथदूरवर्ती ॥ स्व
प्नेनिरुद्धघटनाधिगताभिरूपलक्ष्मीफलामसुरराजसुतां विधाय ॥ अत्र मनोरथानामपिदूरवर्तीत्यपर्यो·

वाच्यः त्वयि निबद्धरतेः प्रियवादिनः प्रणयभंगपराङ्मुखचेतसः ॥ कमपराधनवंममपश्यसि त्यजसि
भामिनि दासजनं यतः ॥ अत्रापराधस्य लवमपीति वाच्यं ॥ अस्थानस्थपदं यथा ॥ प्रियेण संग्रथ्य विपि
पक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ॥ स्रजं न काचिद्विजहौ जलाविलां वसंति हि प्रेम्णि गुणा न वस्तु
नि ॥ अत्र काचिन्न विजहाविति वाच्यं ॥ यथा वा ॥ लग्नः केलिकचग्रहश्लथजटालंबेन निद्रांतरे मुद्रांकः शि
तिकंधरेंदुशकलेनांतः कपोलस्थलं ॥ पार्वत्या नखलक्ष्मशंकितसखीनर्मस्मितह्रीतया प्रोन्मृष्टः ॥ क
रपल्लवेन कुटिलाताम्रच्छविः पातु वः ॥ अत्र नखलक्ष्मेत्यतः पूर्वं कुटिल ॥ ताम्रेति वाच्यं ॥ अस्थानस्थसमास
यथा ॥ अद्यापि स्तनशैलदुर्गविषमे सीमंतिनीनां हृदि स्थातुं वांछति मान एष धिगिति क्रोधादिवालोहितः
उद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात् फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी ॥ अत्र क्रुद्ध
स्योक्तौ ॥ समासो न कृतः ॥ कवेरुक्तौ तु कृतः ॥ संकीर्णं यत्र वाक्यांतरपदानि वाक्यांतरमनुप्रविशंति यथा ॥ कि
मिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमं ॥ ननु मुंच हृदयनाथं कंठे मनसस्तमोरूपं ॥ अत्र पादगतं बहु
गुणं हृदयनाथं मनसस्तमोरूपं कोपं मुंच ॥ एकवाक्यतायां तु क्लिष्टमिति भेदः ॥ गर्भितं यत्र वाक्यस्य मध्ये वा
क्यांतरमनुप्रविशंति ॥ यथा ॥ परापकारनिरतैः दुर्जनैः सह संगतिः वदामि भवतस्तत्त्वं न विधेया कदाच
न ॥ अत्र तृतीयपदो वाक्यांतरे प्रविष्टः ॥ यथा वा ॥ लग्नं रागावृतांग्या सुदृढमिह ययैवासियष्ट्यारिकंठे मातं

गानामपीहोपरिमा च दृष्ट्वा पतंती ॥ नत्सको यं न किंचित् गणपतिविदितं तेनेत्युते नास्मि दत्ता ॥ भृत्येभ्यः श्रीनियोग
द्धक्षितुमिव गते ध्वंधुधिं यस्य कीर्तिः ॥ अत्र च विदितं तेनेत्यिच निगर्भितं रुतं ॥ एतद्रुतं प्रत्युत लक्ष्मीस्ततो पसरती
ति विरुद्धमतिरुतं ॥ मंजीरादिषु रणितप्रायं पक्षिषु चकूजितप्रभृति ॥ स्तनितमणितादि सुरते मेघादिषु गर्जित
प्रभृत्यं ॥ इति प्रसिद्धिमतिक्रांतं ॥ यथा ॥ महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचंडघनगर्जितप्रतिरवानुकारी
मुहुः रवः श्रवणभैरवः स्थगितरोदसीकंदरः कुतोद्य समरोदधेरयमभूतपूर्वः पुरः ॥ रवो मंडूकादिषु प्रसिद्धो न तु
क विशाखरोसिंहनादे ॥ भग्नः प्रक्रमः प्रस्तावो यत्र ॥ यथा ॥ नाथे निशाया नियतेर्नियोगादस्तंगते हंत निशापि
याता ॥ कुलांगनानां हि दुशानुरूपं नातः परं भद्रतरं समस्ति ॥ अत्र गतेति प्रक्रांतं गता निशापीति तु युक्तं ॥ ननु नैकंप
दं द्विः प्रयोज्यं प्रायेणेत्यत्र कथितपदं दुष्टमिति चेहेयोक्तं तत्कथमेकस्य पदस्य द्विः प्रयोगः उच्यते ॥ उद्देश्यप्रतिनिर्दे
श्यव्यतिरिक्तो विषयः ॥ एकपदद्विः प्रयोगनिषेधस्य ॥ तद्गतितु विषये प्रत्युतत्स्येव पदस्य सर्वनाम्नो वाप्रयो
गं विनादोषः ॥ तथाहि ॥ उदेति सविता ताम्रस्ताम्र एवास्तमेति च ॥ संपत्तौ च विपत्तौ च महतामेकरूपता ॥ अत्र रक्त
एवास्तमेतीति यदा क्रियते तदा पदांतरप्रतिपादितः स एवार्थोन्यतरत्वेन प्रतिभासमानः ॥ प्रतीतिं स्थगयति ॥ यशो
धिगंतुं सुखलिप्सया मनुष्यसंख्यामतिवर्तितुं वा ॥ निरुत्सुकानामभियोगभाजां समुत्सुकेवांकमुपैति सिद्धिः ॥
अत्र प्रत्ययस्य सुखमीहितुं वेति युक्तं ॥ ते हिमालयमामंत्र्य पुनः प्रेक्ष्य च शूलिनं सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः
खमुद्ययुः ॥ अत्र सर्वनाम्नः ॥ अनेन विसृष्टा इति तु वाच्यं ॥ महीभृतः पुत्रवतोपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं

अनंतपुष्पस्यमधोर्हिचूतेद्विरेफमालासविशेषसंगा ॥ अत्रपर्यायस्य ॥ महीभृतोपत्यवतोपीतियुक्तं ॥ अत्रसत्यपि
पुत्रेकन्यारूपेपत्येस्नेहोस्तीतिकेचित्समर्थयंति ॥ विपदोभिभवंत्यविक्रमंरहयत्यापदुपेतमायतिः ॥ ल
घुतानियतानिरायतेरगरीयान्नपदंनृपश्रियः ॥ अत्रोपसर्गस्यपर्यायस्यच ॥ तदभिभवः कुरुतेनिरायतिंलघुतांभ
जतेनिरायतिर्लघुतामाद्युः नपदमितियुक्तं ॥ काश्चित्कीर्णारजोभिर्दिवमनुविदधौमंदवक्रेंदुलक्ष्मीरश्रीकाः काश्चि
दंतर्दिशइवदधिरेदाहमुद्भ्रांतसत्त्वाः ॥ भ्रेमुर्वात्याइवान्याः प्रतिपदमपराभूमिवत्कंपमानाः प्रस्थानेपा
र्थिवानामशिवमितिपुरोभावितनार्यः शशंसुः ॥ अत्रवचनस्य ॥ काश्चित्कीर्णारजोभिर्दिवमनुविदधुर्मंदव
क्रेंदुशोभानिश्रीकाइतिकंपमानाइत्यत्रकंपमीयुरितिपठनीयं ॥ गाहंतांमहिषानिपानसलिलंशृंगैर्मुहुस्ता
डितंछायाबद्धकदंबकंमृगकुलंरोमंथमभ्यस्यतु ॥ विस्रब्धैः क्रियतांवराहततिभिर्मुस्ताक्षतिः पल्वलेवि
श्रांतिंलभतामिदंचशिथिलज्याबंधमस्मद्धनुः ॥ अत्रकारकस्य ॥ विस्रब्धारचयंतुशूकरवराइत्यदुष्टं ॥ अक
लितनयस्तेजोवीर्यपृथिविभ्रमयशोनिध्यावाक्तिपमदाध्मातेरोषान्मुनावभिधावति ॥ अभिनवधनवि
श्राणदपिक्षमायचकर्मणोस्फुरतिरभसात्पाणिः पादोपसंग्रहणायच ॥ अत्रक्रमस्य ॥ पादोपसंग्रहणाये
ति ॥ हिपूर्वंवाच्यं ॥ एवमन्यत्राप्युपसर्ज्यं ॥ अविद्यमानः क्रमोयत्र ॥ द्वयंगतंसंप्रतिशोचनीयतांसमागमप्रा
र्थनयाकपालिनः ॥ कलाचसाकांतिमतीकलावतस्त्वमस्यलोकस्यचनेत्रकौमुदी ॥ अत्रत्वंशब्दादनंतरंच

कार्येयुक्तः॥ यथा वा॥ शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नापदोषा करश्रीश्चक्रं पार्श्वे तवैषा प्रतिवसति महा॥
कूर्मीस्वकृपश्चिः॥ आज्ञेयं सर्वगा ते विलसति च पुनः किं मया स्तूयसे ते प्रोच्येचेत्थं प्रकोपाच्छशिकरसित
यायस्य कीर्त्याप्रयातां॥ अत्र हेत्थं प्रोच्येयेति न्याय्यं॥ तथा लग्नं रागाद्वेत्तां गेपत्यादोऽइति श्रीनियोगादिति वाच्यं
अमतः प्रकृतविरुद्धः परार्थापत्र॥ रामम न्मथशरेण ताडितादुःस्सहे नहृदये निशाचरी॥ गंधवद्रुधिरचं
दनोक्षितागजीविते शगसतीं जगाम सा॥ अत्र प्रकृते रसे विरुद्धस्य शृंगारस्य व्यंजकोपरोर्थः॥ अर्थदोषाना
ह॥ अप्रयोपुष्टः कष्टो व्याहत पुनरुक्त दुःक्रमग्राम्याः॥ संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च॥ अनवीकृतः
सनियमानियम विशेषाविशेष परिवृत्ताः॥ साकांक्षोपदमुक्तः सहचरभिन्नः प्रकाशितविरुद्धः॥ विध्यनु
वादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः॥ दुष्ट इति संबध्यते॥ क्रमेणोदाहरणं॥ अतिविततगगनसरणिप्रसर
णपरिमुक्तविश्रमानंदः॥ मरुदुल्लसितसौरभकमलाकरहासकृद्रविः जयति॥ अत्रातिविततत्वादयोऽनुपादा
नेपि प्रतिपाद्यमानमर्थं न बाधंते इत्यपुष्टाः॥ न त्वसंगताः पुनरुक्ता वा॥ सदा मध्ये यासाममृतनिष्यंदसरसो सर
स्वत्युद्दामा वहति बहुमार्गा परिमलं प्रसादं ता एता घनपरिचिताः केन महतां महाकाव्यव्योम्नि स्फुरितमधुरायां॥
गुरुचयः॥ अत्र यासां कविरुचीनां मध्ये सुकुमारविचित्रमध्यमात्मकत्रिमार्गा भारती चमत्कारं वहति ताः गं
भीरकव्यपरिचिताः कथमितरकाव्यवत्प्रसन्नाः भवंतु॥ यासामादित्यप्रभाराणां मध्ये त्रिपथगा वहति॥ ता
मेघपरिचिताः कथं प्रसन्नाः भवंतीति संत्ते पार्थः॥ जगति जयिनस्ते ते भावा नवेंदुकलादयः॥ प्रकृतिमधु

॥३५॥ रा: ॥ संत्येवान्ये मनोमदयंतीये ॥ मनुयदिदं पार्तो लोचन चंद्रिका नयनविषयं जन्मन्येकः स एव महोत्सवः ॥ अ
चंदुकलादयो वपुस्ति पस्पश प्राया: स एव चंद्रिकात्वमुत्कर्षो यमारोपयतीति व्याहतत्वं ॥ रुतमनुमतमित्यादि
अर्जुनार्जुनेतिभवद्भिरिति चोक्ते स भीमः किरीटिनामेति किरीटिपदार्थः पुनरुक्तः ॥ यथा वा ॥ अस्त्रज्वाला
वलीढप्रतिवलजलधेरंतरौर्वायमाणे सेनानाथे स्थितेस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणां ॥ कर्णाल
संभ्रमेणाव्रज रूप समरं मुंच हार्दिक्यशंकां ताते चापद्वितीये वहति रणधुरां को भयस्यावकाश: ॥ अत्र चतुर्थ
पादवाक्यार्थ: पुनरुक्तः ॥ भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव ॥ विश्राणय तुरंगं मे मातंगं वा मदालसं ॥
अत्र मातंगस्य पदार्थः ईदृशो व्याप्यः स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते ॥ तदपि सांप्र
तमाहर कूर्पकं त्वरितं मूरुमुवं च य कुंचितं ॥ एषो विदग्धः ॥ मात्सर्यमुत्सार्येत्यादि ॥ अत्र प्रकरणाद्यभा
वे संदेह: ॥ शांतमस्मंगार्थ्यं तरामिधाने निमुपः ॥ गृहीतं येनासी: परिभावभयान्नोचितमपि प्रभावाद्य ॥
स्यामूपन्नखलु तवकश्चिन्यायविषय: ॥ परित्यक्तं तेनत्वमसि सुतशोकान्नतु भयाद्विमोक्ष्ये शस्त्र त्वामहमपि य
यतः स्वस्ति भवते ॥ अत्र द्वितीयशस्त्रमोचने हेतुर्नोपात्तः ॥ इदं ते केनोक्तं कथय कमलातंक वदने यदेतस्मिन् हे
म्नः कटकमिति धत्से खलु धियं ॥ इदं तेसाध्याक्रमण परमास्त्रं स्मृतिभुवा तव प्रीत्या चक्रं करकमलमूले विनि
हितं ॥ अत्र कामस्य चक्रं लोके ऽप्रसिद्धं ॥ उपपरिसरं गोदावर्या: परित्यजताध्वगाः सरणिरपमरो मार्गस्ताय
द्भवद्भिरिहेक्ष्यतां ॥ इहहि विहितो रक्ताशोक: कयापि हताशया चरणचरणनलिनन्यासोदंचन्नवांकुरकंचुक: पा

दाघातेनाशोकस्य पुष्पोद्गमः कविप्रसिद्धः ॥ न नवांकुरः ॥ सुसितवसनालंकारायां कदाचन

कौमुदीमहसि सुदृशि स्वैरं यांत्यां गतोऽस्तमभूद्विधुः तदनु भवतः कीर्तिः केनाप्यगीयत येन सा प्रि

याग्रहमगान्मुक्ताशंका केनासि शुभप्रदः ॥ अत्रामूर्त्तायामपि कीर्त्तेर्ज्योत्स्नावत्प्रकाशरूपा कथिते

ति लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टं ॥ सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ॥ नानाविध्या

नि शास्त्राणि व्याचष्टे च शृणोति च ॥ ग्रहोपरागं विना रात्रौ स्नानं धर्मशास्त्रेराविरुद्धं ॥ अनन्यसदृशं

यस्य बलं बाह्वोः समीक्षते ॥ पादूरायानुस्तुतिस्तस्य सत्यं सा निःप्रयोजना ॥ एतदपि शास्त्रेण ॥ विध्या

य दूरे केयूरमनंगांगदमंगना ॥ भवार क्रांतेन कृतां कर ॥ जोल्लेखमालिकां ॥ केयूरपदेन नखक्षतं नाभि

हितं ॥ अश्लेषांगयोगपरिशीलनकौशलेन नडुःसाधयसि हृतसविधं विदधद्दूरे ॥ आसादयन्नभिमतामधु

नाविवेकख्यातिं समाधिधनमौलिमणिर्विमुक्तः ॥ विवेकख्यातिः संप्रज्ञातः पश्चादसंप्रज्ञातस्ततो मुक्ति

र्न तु विवेकख्यातेः ॥ एवं विधान्तरैरपि मुदाहार्यं ॥ प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि

विद्विषतां ततः किं ॥ संतर्पिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किं ॥ अत्र ततः

किमिति न न वी रूतं ॥ न गुणपा ॥ यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ॥ लवणमंबुस

दैवमहोदधेः प्रकृतिरेव सतामविषादिता ॥ यत्रानुल्लिखिताक्षमेव निखिलं निर्माणमेतद्विधेरुत्कर्षप्रति

॥ योगिकल्पनमपि न्यक्कारको विः पर ॥ यान्ताः प्राणाभ्यर्तां मनोरथगतीरुल्लंघ्य यत्संपदस्तस्याभासमणीकृता
श्मसु मणेरश्मत्वमेवोचितं ॥ अत्र धारामात्रमणीकृताश्मसु मणेरस्तस्याश्मत्वे वोचितेति सा नियमत्वं वा
च्यं ॥ वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणा
स्ते समुद्रः ॥ वाहिन्याः पार्श्वमेताः क्षणमपि भवतो नैव मुंचंत्यभीक्ष्णं स्वच्छेऽन्तर्मानसेऽस्मिन् कथमवनि
पते तेऽम्बुपानाभिलाषः ॥ अत्र शोण एवेति नियमो न वाच्यः ॥ श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषी
कूर्चकैः मंत्रं तंत्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियं ॥ चंद्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलाप
ट्टके येन द्रष्टुमहं क्षमे दिशदिशस्तद्वक्त्रमुद्रांकिताः ॥ अत्र ज्योत्स्नामिति श्यामविशेषो वाच्यः ॥ कल्लो
लवेल्लितदृषत्परुषप्रहारैः रत्नान्यमूनि मकरालय मावमंस्थाः ॥ किं कौस्तुभेन विहितो भवतो ॥